स्पेत्पराद्रि जलदामेघास्तेषांविलसितंवर्षणरूपोविलासःकस्यसुखायनोभवति नकेवलंमदर्थमेववर्षणीयमपितुसर्वप्राणि
सुखार्थमितिभावः शेषंस्पष्टं ५६ विश्राम्येतन्नुतिरसमितैर्यत्रचेदद्रिभिःसामंदाक्रांताभवतिहिमभानस्ततोगौस्फुरेयत

Acc. NO. ~~1014~~ M-1519
Title - वृत्तरत्नाकर. (only 1st अध्याय)
Author - नारायण.
Date - ?
Subject - वृत्त. (Metre)
folio - 25.
Xerox - 51

११९

स्थो

अथ मात्रावृत्तानि कथयंस्तावन्मात्राघटितगणवृत्तानि द्विभागान्याह एकादशभिः आर्येति [illegible]
एकोऽगुरुरश्चैते प्रस्तुतमेव मार्याछन्दसः प्रथमार्द्धं भवति तत्र विषमस्थाने स्थोजगणेन प्रयोक्तव्यः समस्थाने तु कामतः यस्य प्रथ
मार्द्धस्य रसनिधि षष्ठस्थाने ज्ञा वा यथा वा नलघुश्चतुर्लघुर्गुणः प्रयोक्तव्य इति नियमः परं अर्द्धं द्वितीयमर्द्धं अंगलं अंगे षष्ठस्थाने लघुर्यो
त्रेति पूर्वार्द्धलक्षणमेव सर्वमुत्तरार्द्धे पि परं तु षष्ठस्थाने जगणश्चतुर्लघोर्न्यन न्यासस्य पवादत्वेतो लघुरेक इति विशेष इत्यर्थः तथा
वृत्तरत्नाकरे स्वरा अर्द्धं चार्यार्द्धं गणा इत्यनुवर्त्तते बहुवचनेन विपरिणम्यते स्वराः सप्तगणा अर्द्धं च गणस्य तच्च गुरुरेव न लघुरि
यं यद्यप्यर्धशब्देन तदुभयं प्राप्नोति तथापि प्रथमोपस्थितत्वात् प्रथमभेदस्यैवार्द्धस्यात्र ग्रहणात् महाकवीनां तादृशप्रयोगा

आर्यायाः प्रथमार्द्धं मुनिगणगुरुभिः स्तुतं न विषमो जः यश्च सनिष्ठो नलघुर्वार्द्धं परमंगलं जयति १

नु नन्वेवं सति स्वराश्चार्यार्द्धमित्येव वक्तुमुचितं गुरुभूतेन किमर्द्धशब्देनेति चेन्न आर्यादीनां गणवृत्तत्वनिर्वाहायार्द्धग्रहण
न् अन्यथोभयग्रहणापत्तौ चार्यार्द्धमित्येव ब्रूयात् अत्रार्द्धस्य लक्षणं कुर्वाण एवं ज्ञापयत्याचार्यो यदार्यायामवांतर
पादव्यवस्था नास्तीति तेन द्वीपादन्यस्मादपि संध्यासलिललाजलिमिया दोगणत्रयांते गुरुत्वं न अत्रायुक्तं जू अ
त्रार्यायां अयुक्तं विषमो गणो मध्यगुरुर्न कर्त्तव्यः षष्ठो जः अत्र षष्ठो गणो मध्यगुरुर्भवति षष्ठ इति पूरणप्रत्ययांतेन ज
स्य गणत्वं ज्ञाप्यते ज्ञापकं चेदं सामान्यापेक्षमिति मादीनां गणत्वं सिध्यति यदि तु वेदानध्यापयामास महाभारत
पंचमानीतिवद् द्वगणस्यापि षट्संख्यापूरकत्वं संभवेदित्युच्यते न हि मादीनां लोकादेव गणत्वसिद्धिः लौवा
अत्रेतिवर्त्तते आर्यायां षष्ठो गणः सर्वलघुर्वा भवति लौवेत्सदं द्वितीयादिः षष्ठो गणः सर्वलघुश्चेद्भवति तद

सप्तमः प्रथमादिः षष्ठगणे मध्यगुरौ सर्वलघौ वा जाते सप्तमो गणः सर्वलघु
नदी यद्द्वितीयलघोरारभ्य पदं प्रवर्त्तते अंत्ये पंचमः अंत्येर्द्धे पंचमश्चेत्सर्वलघुर्गणो भवति त
र्ह्युद्भवति नदा नदीय प्रथमाल्लघोरारभ्य पदं प्रवर्त्तते एतल्लक्षणत्रयं पाच्यों ऽग्रिमश्लोकेनिबद्धः षष्ठश्च [illegible] अंत्यर्द्ध इति वृत्तेते
दा नदीय प्रथमलघोरारभ्य पदं प्रवर्त्तते षष्ठो गण एकमात्रो भवति शेष
द्वितीयेर्द्धे मध्यगुरौ सर्वलघौ वा षष्ठगणे प्राप्ते तदपवादो लकारो विधीयते तेन गणवृत्तत्वमव्याहतं भवति मात्रासु स
र्वार्द्धवदित्यर्थः षष्ठद्युतिपरणप्रत्ययेन लस्य गणत्वमतिदिश्यते उदाहरणमिदमेव वृत्तं तत्रार्द्धनारीश्वरं स्तौति पायाः आ
विंशति रुत्तरार्द्धे पूर्वार्द्धं तु त्रिंशद्भवतीत्यर्थः फलितः उदाहरणमिदमेव वृत्तं तत्रार्द्धनारीश्वरं स्तौति पायाः हिते
राक्षयपाः प्रथमार्द्धे वामभागः राहोः शिर इति वदभेद षष्ठी मुनिगणव्यासादयस्तेगुरवो हिताः हितो
पदेष्टारस्तैः स्तुन पुराणादिषु कीदृशोनविषं नास्ति विषमत्र दक्षिणभागो विषमस्तीत्यर्थो दायाति ओजो
दीप्तिरूपं परमंगलपरं श्रेष्ठं चतन्मंगलं कल्याणस्वरूपं वृद्धस्येदं वार्द्धं अनादिपुरुषस्य द्वितीयमर्द्धं दक्षि
णभागः तदुभयत्रजयतीत्यन्वेति यद्वासो यद्विषयको रागस्तत्रानिशानिश्रयेन स्थितिर्यस्य तादृशोजनो
लघुर्न किं तु गुरुरेवेत्यर्थः अत्र षष्ठो जगणः प्रयुक्तः उद्भवनिका यथा ऽऽ·ऽ।।·ऽऽ·।।।।·।।ऽ·।ऽ।·।।ऽ·ऽ·ऽ।।·
ऽऽ·।।ऽ·ऽऽ·।।ऽ·।·ऽ।।·ऽ· ॥३॥

न्लो चेत्यादिस्तत्रार्थमाह यस्यामिति यस्यामार्यायां रसंगेषष्ठस्थानगतेनलघोः सर्वलघुगणे सति द्वितीयलघु
तत्सदीयद्वितीयलघोरारभ्य नियमात् परपदमन्यपदं प्रवर्त्तते इति शेषः तत्सरके तस्मात् षष्ठादुत्तरे सप्तमे नल
तत्सदीयद्वितीयलघोरारभ्य नियमात् परपदमन्यपदं प्रवर्त्तत इति शेषः
धौसति सुखमात्रात् सुखं प्रथमः स तन्मात्रं तादृशाल्लघोरारभ्य पदं प्रवर्त्तते इति प्रथमेर्द्धे यतिः चरमेत्येर्द्धे
खरमेरवमिंद्रियं पंचमस्थानं तत्र रमति विहरति ति छतीतियावत् तादृशे नलघो सति सुखसरलतः तस्यैवा
ग्रेसरा आरभ्य परपदं प्रवर्त्तते तत्रेदमेवोदाहरणं तुपरपेति षष्ठो गणोत्र सर्वलघुस्तत्र पवर्णाद्
यस्यां रसंगेनलघोर्द्वितीयलघुतस्तु परपदं नियमात् तत्सरके सुखमात्रात् खरमे सुखसरल
तत्स्मरमे २
रभ्य परं प्रवृत्तं सप्तमनलघोरुदाहरणं स्वयमूह्यं अन्त्यार्द्धे सुखसरेति पंचमः सर्वलघुस्तत्र प्रथमान् सुख
वर्णाद् आरभ्य परं प्रवृत्तं उद्द्वनिका यथा ऽऽ-।।ऽ-।।ऽ-।ऽ।-।।ऽ-।।।।-ऽ।।-ऽ- -ऽ।।-ऽ।।-ऽऽ-।।ऽ-।।।।-।-ऽ।।-ऽ- अथा
स्यार्यायाः स्तवः सम्योर्थस्तथाहि यस्यामार्यायां नलघोश्रेष्ठजने रसंगे भाग्यात्प्रीतिंगते सति परपदमुत्कृष्टस्थानं स्व
गीरिभवति तु रन्यं देवनाथ्यावर्त्तकः ननु तदितरदेवाल्कुतो नानन्दित्यत आह द्वितीयलघुतः ततो द्वितीयदेव
तस्य लघुत्वादित्यर्थः अतो हेतोर्मुखमात्रात्तत्सरके वचनमात्रेणार्यायां तत्परे मनसा तत्परो मा सुवातादृशोपि जने
हरमे लीलया तस्मिन्नासक्तो भवामि किंपुनर्मनसाभक्त्या सक्तोस्त्यर्थः चोप्यर्थकः तत्र हेतुः सुखसरलतः वृ

नसाधुत्वात् कीदृशो जने रवरमे स्वरानीदृ
मा श्रीरस्य तस्मिंस्तेजस्विनीत्यर्थः २

अथार्याविशिष्यलक्षयति पथ्येति उभयत्र उभयोरर्द्धयोर्यात्रिषुगणेषुजातेषुसत्सु पदेविश्रामस्सत्सुखस्य
विधात्री कत्र्य२ सार्या पथ्यानामसर्वेषांमते अतएवासौश्रव्याश्रोतुमर्हा संस्कविभिश्चसेवितुमर्हा श्रुत
बोधंनामकालिदासनिबंधमपिपालयतु यस्याःपादेप्रथमेद्वादशमात्रास्तथातृतीयेपि अष्टादशद्विती
ये चतुर्थकेपंचदशसार्यापी इति लक्षणंसंगृहीतमित्यर्थः अत्रपादग्रहणंयतिपरतयाव्याख्येयमितिभावः
तथाचसूत्रं त्रिषुगणेषुपादःपथ्यादेचाः चकारेणान्सइतिसमुच्चीयते तस्मा आद्येतेचार्द्धे त्रिषुगणेषु

पथ्यार्यासर्वेषामुभयत्रत्रिगणपदसुखविधात्री यासौसत्कविसेव्याश्रव्याश्रुतबोधम
पथ्यात ३

जातेषुसत्सुपादोभवतिसार्यापथ्यानाम अत्रपद्येगम्यन्ते विश्रामस्थानमत्रेतिव्युत्पत्तेःपादशब्दोय
तिपरः वैतालीयसूत्रेपादग्रहणज्ञापकाच्च अन्यथाप्रागुक्तद्वीपादन्यस्मादपीत्यादौगुरुत्वापत्तेः
अथास्यसम्योर्थः उभयत्रैहिकामुष्मिकयोरार्यासर्वेषांपथ्यासर्वेभ्योहिताभवेत् यतस्त्रिगणस्यध
र्मार्थकामरूपस्यपदेत्राणंतेनसुखंमुक्तिरूपंतस्यविधात्री अतोसौश्रव्याश्रुत्यादिवाक्यैःश्रोतुमर्हा वि
धेयश्रवणावा श्रुतस्यशास्त्रस्यबोधंरक्षतु इति ३

२

अथापरमार्या विशेषमाह विपुलेति या त्रिगुणाद् उपरि त्रिगणाद् अधिकमात्रासु सुप्तिङन्तपदेषु स्थितिं विश्रा
मस्थानं प्रयच्छति ददाति एकस्मिन्नाद्ये उत्तरे द्वे वा उभयत्र उभयोर्द्वयोस्त्रिगणाद् उपरि यतिजनितं श्रवण
सुखं ददाति तच्छीला सार्या विपुलानाम जयति आदिविपुला न्तविपुलोभयविपुलेति सा त्रिधेति भावः तथा
चरत्ने विपुलान्या पथ्याल्लक्षणस्याद्यन्त तदुभयवैकल्यात्तदन्यत्वसंभवेन त्रैविध्यं विपुलाया इत्यर्थः

विपुलार्या त्रिगुणाद् उपरि पदे कवयोः स्थितिं प्रयच्छति या उभयत्र श्रुतिसुखदात्री धात्री जयति
सुकवीनां ४

यथात्रैव उपरीति रीवर्णान्ते दात्रीति त्रीवर्णान्ते च पदं विश्राम्यतीत्युभयविपुलेयं एवमाद्यन्तविपुला
द्वयमूह्यं अथ सम्प्रार्थः विपुला महती याऽऽर्या त्रिगुणाद्धर्मादेरुपरि ऊर्ध्वं परे मोक्षस्थाने स्थितिं साम्प्र
यच्छति उभयत्र ऐहिकामुष्मिकयोः श्रवणमात्रेण सुखदात्री धारणपोषणकर्त्री च सा जयति ४

आर्याविशेषांतरमाह गुर्विति यतोयस्माद्धेतोः पूर्वे प्रथमेऽर्द्धे द्वितीयतुर्यस्थानस्थौ जोजगणौ नियम्यया भजते तामार्यां
मुखपूर्वां चपलां मुखचपलांनाम आर्यामान्याः स्मरंति कीदृग्जो गुरुमध्यगतः गुरुमध्यवर्त्तिना विस्यर्थः तेनप्रथ
मागणेन नगुरु द्विगुरुर्वा तृतीयो द्विगुरुरेव पंचमस्त्वादिगुरु द्विगुरुर्वा शेषं यथाप्राप्तं तथाच सूत्रं चपलाद्वितीयचतुर्थौ गम
ध्येजौ अधिकारोयं प्राग्गीतेः गौ गुर्वोर्मध्यं मध्ये उक्तप्रकारेण गुर्वोर्मध्ये द्वितीयतुर्यौ जौ भवतस्तदासार्याचपलानाम
पूर्वेमुखपूर्वा पूर्वार्द्धे चपलालक्षणं चेद्भवति तदामुखचपलानाम तद्यथास्मिन्नेव वृत्तेच पलालक्षणं अथसभ्यार्थस्त

गुरुमध्यगतोयतोजौ द्वितीयतुर्यौ नियम्यभजते या पूर्वे तांमुखपूर्वां चप[illegible]लामार्यांस्मरंत्यार्याः ५
त्वादेतेनमायाभिमतमायारूपेणार्यां वर्णयति गुरुमध्यगतइति याद्वितीयतुर्यौ वजावीश्वरजीवौ नियम्यभजते गुरुम
ध्यं घनानंदरूपं शुद्धचैतन्यमेव साक्षि ततोद्वितीयतुर्यत्वमीश्वरजीवयोस्तथाहि तन्मते मायोपाधिभेदादीश्वरः मायो
पलक्षितमीश्वरः साक्षी अविद्योपाधिजीवस्तदुपलक्षितं जीवसाक्षी तत्रसमष्ट्यज्ञानं माया व्यष्ट्यज्ञानमविद्येति एवं
चमायायाः साक्षिचैतन्ययोरुपलक्षणत्वान्न नियमेन भजनं किंतु जीवेश्वरयोरेवोपपद्यते अजामेकामित्यादि श्रुतेः
पूर्वे आर्याः व्यासादयस्तामार्यां वंदनीयां मायां मुखचपलां सुखमादिश्चपलोऽलक्ष्योऽस्यास्तामममनादिमित्यर्थस्ता
दृशीं स्मरंति ५ रामराम तवपादपंकजं श्रीरामः शरणंमम श्रीरामायनमः

३

अथार्याभेदमाह तामिति या अंत्ये अंत्येऽर्द्धे गुरुमध्यवर्त्तिनौ द्वितीयचतुर्थस्थानस्थौ जगणौ भजते तु शब्दः पूर्वार्द्धव्यवच्छिन्नत्ति
नतिमहे तिनत्यस्तत्तंबुद्धिर्हिनत्यविद्वन् ता भार्या जघनचपला नाम नित्यं भिवेदयस्व कथयेत्यर्थः जघनपूर्वे तरत्र इतरत्र द्वितीये
र्द्धे द्वितीयचतुर्थौ मध्यजौ यदि भवनस्तदा चपला जघनपूर्वा जघनचपला नामेत्यर्थः इदमेवोदाहरणं सभ्यार्थस्तु उत्तरार्द्धस्य
पूर्ववत् पूर्वार्द्धस्य विशेषः घनो मेघस्तद्वच्चपला तां भार्या मनसि नित्यं निवेदय निचयजेति ६ अथान्यं चतद्भेदमाह गुरुमध्यतइ
ति द्वितः द्वयोरर्द्धयोरित्यर्थः आद्या द्वितीयात्सार्वे विभक्तिकस्तसिः साया महाचपला नाम शेषं स्पष्टं उभयार्महाचपला द्विती
यचतुर्थौ मध्ये जावितिवर्त्तते सभ्यार्थ पक्षे द्वितइनिद्वाविस्यर्थः स्पष्टमन्यत् पूर्ववत् ७ अपरं च तद्भेदमाह अर्द्धइति उक्ता

नां नत्युजघनचपलां भार्यां नित्यं निवेदयस्वांते गुरुमध्यतोयतो जौ द्वितीयतुर्यौ तु भजते या ६ गुरुमध्यतो द्वि
तो जौ द्वितीयतुर्यौ निम्यभजते या सार्या कवेविचार्या सदा स्वचित्ते महाचपला ७ अर्द्धे यस्याः प्रथमे मुनिगणे
गुरुभिस्तु तेन विषमोजः षड्स निधानलघुर्वार्द्धे पूपरे फणावतो गीतिः ८

र्थाप्रायं अपरे द्वितीयणर्द्धे मुनिगणेत्यादिलक्षणं सर्वं चेत्तदा सार्या फणावतः पिंगलस्य मते गीतिरिति नाम आद्यर्द्धसमा गीतिः
आद्यर्द्धेन समासमात्सार्द्धा आद्यर्द्धग्रहणेनां त्याक्षमाक्षिप्यते यत्तु हलायुधः आद्येन समं यस्यमर्द्धं यस्या इति मध्यपदलोपी स
मास इति नद्दसत् एवं सत्यंत पदलोपो न तु मध्यमपदलोपइत्युनिताद्व्यासमासासंभवात् अथ सभ्यार्थः तत्रार्द्धनारीश्वर
प्रस्तावाद्वा मार्द्धे विषाभावो ऽपरे दक्षिणेर्द्धे फणावतस्तक्षकनागस्य मंडनीभूतस्य गीतिर्गानं प्रसिद्धिरितियावत् शेषमु
क्तार्थम् ८ श्रीरामः शरणं ममेति परमो मंत्रोयमष्टाक्षरः कोदंडरामायनमः सीतारामायनमः श्रीहनुमतेनमः

अथापरं चन्द्रेदमाह यदिति नित्यं निश्चयेन यस्या उभयपार्श्वे उभयो रर्द्धयोः परार्द्धं मंत्यार्द्धं तस्य गणाः लघुषष्ठासार्द्धसप्त
तानगच्छन्ति प्राप्नोतीति परार्द्धगणगा तादृश्युल्लसितानीति यस्यास्तादृशी सेयमार्योपगीतिर्नाम विलसति ताराः सप्त
विंशतिः कलामात्रास्ताभिः शोभनारीतिरस्याः इति प्रश्नार्द्धं फलितार्थकथनं अंत्येनोपगीतिः समेत्यनुवर्तते अंत्यार्द्धेन
समा समार्द्धद्वीयासोपगीतिरित्यर्थः आर्यास्तुतिः नित्यं सर्वदा यस्या उभयपार्श्वे वामदक्षिणपार्श्वयोः परार्द्धसंख्याकाये
गुणानंद्यादयस्तु जता उपगीतिः स्वसमीपगानं विलसति कीदृशी उपगीतिः उल्लसितानीतिः संगीतशास्त्रनयो यस्यां
तादृशी तारात्युच्चैस्वरा कलामधुरास्फुटस्वरा अतएव रम्येयमिति ९ अथापरमपि तद्वेदमाह स्वरेति स्वरगणाः
यदुभयपार्श्वे नित्यं परार्द्धगणगोल्लसन्तीतिः ताराकलासुनीति विलसति रम्येयमुपगीतिः ९ स्वरगण
गरिमायस्या स्वाधरदलमंगलं कुरुते भालेनलमथवा ञं धत्ते लं गैतु ×परे× सोद्गीतिः १०
सप्तगणास्तत्सहितो गरिमा गुरुभावो यस्याः स्वाधरदलं स्वीयपूर्वार्द्धं अंगलं षष्ठस्थानस्थलघुकं कुरुते पूर्वार्द्धे षष्ठस्थाने
लघुरेक इत्यर्थः परे उत्तरार्द्धे तु अंगे षष्ठस्थाने नलं चतुर्लघुगणं अथवा जं जगणं या धत्ते सा उद्गीतिर्नाम कीदृशी आर्या
तिकवीतिस्यापु(?) कीदृशी षष्ठस्थाने भाले भास्यास्तीति भां लातीति वा तादृशी षष्ठे सर्वलघौ सति द्वितीयलघोरारभ्य पदं शी(?)
भाभवतीति भावः उत्क्रमेणोद्गीतिः उत्क्रमाद्विपरीतक्रमउत्क्रमस्तेनाद्यमर्द्धमंते चेद्भवेदंत्यं चादौ तदा सोद्गीतिर्नामार्या
अथात्रापि अर्द्धनारीश्वरं स्तौति स्वरेति यस्याः आर्यायाः निषादादिस्वरगणस्य गुरुत्वं स्वीयस्य वामभागस्याधरदलमोष्ठदलं
तत्र मंगलं कुरुते सार्या उच्चैर्गीतिर्गीयमस्यास्तादृशी वर्ततेति शेषः या च परे दक्षिणभागे गेललाटे नलं तृतीयनेत्रं वह्निं

अथवा अथ च अ ञं चंद्रं च धत्ते धारयतीत्यर्थः १०

गीतिभिन्नाद्यास्तुणाथोच पल्लाभिन्नगीतिभिः भिन्नाषाड्वं ग्रादिसेव मार्यात्री
निसस्तु विपुलासां स्तुग्ध्र पल्लाभिश्रितानव गीतिभिन्नाद्यास्तुणाथोच पल्लाभिन्नगीतिभिः एतेषामुदाहरणानि स्वयमूह्यानि विस्तर
तिभेविदिह इति विपुलाभेदाः षष्ठिरूभयेषां सकलनायात्रीतिरिति वक्षिति वसंवादेवविशेषासेषांगणः समु
मिंयादिहेनोक्तानि अथसभ्यार्थः तत्राईनारीश्वररूपमार्या ज्ञेति वक्षिति सकलद्धितयंनारीस्वरूपंय स्यास्तामायाम हे हृदये निधा
द्यायः येद्धा वसवश्च गणनंघादयश्च तैर्वं दितं शकलद्धितयंनारीस्वरूपंय स्यास्तामायाम हे हृदयेनिधा
स्तवीमि कामिव गीतिंगान प्रतिपादकं संगीतशास्त्रमिव कीदृशीगीतिं वसुगणोविश्वावस्वादिर्गंधर्वगं
णस्तेन वंदितं स्वरप्रस्ताररूपं खंडद्वयं यस्याः कीदृशीमार्या चतुषष्ठिकलासुसाम्येनादायादरणीया
गीतिगानमस्यास्तादृशी संगीतपक्षेतु निषादादिषुसप्तसुस्वरेषु कलस्य ध्वनेरसाम्यात्सर्वत्रावस्थिति सा
म्याभावात आदरणीयं गानमनया तादृशी त्वर्यांगुर्वीमिति विशेषणद्वयमुभयपक्षेस्फुटमिति ११
इति परीक्षायामार्याविवरणं श्रीराम

अथ मात्राछंदःसु विशेषं वैतालीयमधिकृत्य लक्ष्यते विषम इति वैतालीयछंदसि विषमे पदे प्रथमे तृतीये च चरणे मु
खे आरंभे अंगलाः षण्मात्राः प्रयोक्तव्याः इति शेषः समे द्वितीये चतुर्थे च पादे तु ताः षण्मात्रा नयने द्वे मात्रे च एवमष्टौ मा
त्रा आदिभागे अत्ययस्तु विषमयोः समयोस्तु भागे रात्मध्यलघोः परो लघुगुरू प्रयोक्तव्यौ अयं भावः विषमयोः पादयोश्चतुर्दश
मात्राः समयोस्तु षोडश तत्र विषमस्य प्रथमभागे षण्मात्रा सदंते रगणेन लघुगुरु चेत्येवंरूपा अष्टौ इत्येवं चतुर्दश समस्यादि
भागे अष्टौ मात्रास्तदंते रगणलघुगुरव इत्येवंरूपा अष्टावित्थं षोडशेति नियम्यते अथात्र विशेषनियममाह
संगता इति ताश्च समे इति पुनरत्र प्रयुज्यन्ते ताः षण्मात्राः समे पादे संगताः यथासंभवं गुरुरूपतया मिश्रिता न तु पृथ
क् २ प्रयोगेण सर्वा विरला इत्यर्थः नियमांतरमाह समल इति षट्सु अष्टसु चादिभागमात्रासु समं द्वितीयश्चतुर्थः षष्ठश्च

∴ विषमेङ्गकलाः पदे मुखे नयने ताश्च समे तु संगताः समलः परगौरवासहो वैतालीये रलगास्तु ये ३१

लो मात्रा परेण परमात्रया सह गौरवं गुरुतां न सहते इत्यसहः द्वितीयात्तृतीयाभ्यां चतुर्थपंचमीभ्यां समपादे तु षष्ठीसप्तमीभ्यां च मात्राभ्यामे
को गुरुर्न कार्यः शेषाणां तु कामचार इत्यर्थः इत्यभिप्रेत्याहाचार्यः वैतालीयं द्विस्वरा अयुक्पादे युग्वसवोते ल्गौः लः समुद्रागण इत्यतो
ल इत्यनुवर्तते अयुक्पादे विषमे द्विःस्वराश्चतुर्दश लो मात्रा युक्पादे समे =रः= पादे द्विर्वसवः षोडश मात्राः अंते रलगाः स्युस्त
द्वैतालीयं नामेत्यर्थः यथासत्रात्वादशाह्नुवर्तमाने पुनरत्र पादग्रहणं ज्ञापयत्यार्यायां चतुर्भागः पादो नेति अंतस्तस्यादि भागले
सिद्धं गोपच्छंदसिकं वैतालीय एव गुरुरंते कश्चेदंते अधिकस्तदौपच्छंदसिकं नाम आपातलिकाभोग द्विःस्वरायुक्पादे युग्वस
वांतरूति वर्जते षण्मात्रांते अशंते च रलगा पयोदा भगणेन गुरुद्वयं चेत्तदा तद्वैतालीयमापातलिका नाम एतत्सूत्रद्वयस्यार्थो

अथ तस्येव भेदान्तरं लक्षयति पत्रेति यस्मिन्वैतालीये त्वंते पादांत्यभागे गाल्गुरुद्वयस्यापवादो भोगे गुरुः भगणो गुरुद्वयं चेति यदि स्यात् शेषं समविषम
पादादिभागमात्रासु अष्टपदरूपासु वैतालीयछंदो वत् अलंकृतिर्वेषा यथोक्तमिश्रणभिश्रणरूप आभूषणवेषा स्यात्सा ईदृशी सा आपातलिकाना
मभवेत् हे कविजनजागर्हि हे हृत् लक्षणावधारणे सावधानो भवेति समीचीना संसृतिलक्ष्मी भुंक्ते दोगति रोगाभाय स्यात्साईदृशी त्वापातलिका विशेष
णं तावदे ननु लक्षणान्यवः अथेद कं चित्साक्षरं सुरवासके प्रतिभासु रूपाभूरित्याह पत्रेति यस्यां गुरुर्महान् भोगो वनितादिसुखानुभवः सा
संसृतिलक्ष्मीः संसारश्रीरंते आपातलिका अस्थिरा हे कविजन शेषस्वधिषिमुहुःसीतियावत् जागृहि सत्यासत्यवस्तुविवेचने सावधानो
भव अन्यथा अनर्थप्राप्तिरित्याह येसादि या त्वया ऽनुभूयमाना संसारलक्ष्मीः सैषा वैतालीयालंकृतिर्वेषा पैशाचभूषणवेषापि प्राचीय
थाभिथ्येवभूषणानि सुवेषं च प्रदर्शनीयं विधत्तेन तथैवेयमिति भावः १४ अथान्यं चतद्भेदमाह समेति समयोः पादयोर्वदने आदिभागे वर्त

पत्रनु भोगो गुरुरंते सापातलिका संसृतिलक्ष्मीः कविजन रोजागृहि पैषा वैतालीयालंकृतिर्वेषा १४ समवदनोऽनागप्रगयोः पंचमेन सह युक्तश्चतुर्थकः वैतालीयैः कलापैः प्राच्यवृत्तिरुदिता निकोविदैः १५

मानयोर्नागप्रगयोर् हूमात्रासंघयोः स्थितेन पंचमलकारेण सह चतुर्थको लकारोयुक्तः संज्ञः चतुर्थपंचमीभ्यां मात्राभ्यां एको गुरुर्यदि भवेदि
त्यर्थः तदा कोविदैश्छंदोभिज्ञैश्चार्यैः प्राच्यवृत्तिरिति नाम्ना पिहिता कथिता कीदृशी वैतालीयछंदो लक्षणैस्यैः कलापैः मात्राचिन्हैरुपलक्षिता वै
तालीयस्यैव सर्वे मात्रालक्षणं समपादे चतुर्थपंचममात्रयोरन्योन्यमिश्रणमित्यैव विशेष इति भावः तथा च सूत्रं पंचमेन पूर्वः साकं प्राच्यवृत्ति
युजीत्यनुवर्तते युग्मिति च शेषे परेणयुक्सा कमितरेन पंचमचतुर्थयोर्योगो निषिद्धः सोनेन युक्पादे विधीयते अन्यथा प्राप्तमेव यदा प
चमेन लकारेण साकं पूर्वश्चतुर्थो लकारोयुक्तो भवति तदा प्राच्यवृत्तिर्नाम अथात्र प्राच्यजनानामाचरणमाह समेति समेषां सर्वेषामाप
मरस्त्रीबालवृद्धजनानां वदने मुखे नागप्रगयोः तांबूलक्रमुकयोश्चतुर्थः खदिरः पंचमेन नमाखुपत्रेण सह युज्यत इति युक्तं अनुक्तमपि
न तीयं चूर्णमाक्षेपाल्लभ्यते नागवल्लीदलं पूगीफलं चूर्णं जलं तथा खदिरश्चतमालं च तांबूलं पंचसाधनमिति प्रसिद्धः इत्येवं प्राच्यानां

अथापरं वनेन्द्रदमाह विलोचनेति यावेतालीयजातिः विषमपाद गतां विलोचनकलां द्वितीयमात्रां गुणाश्रितां तृतीयमात्रयाश्लिष्टां द्विती
यतृतीयाभ्यामेकोगुरुरित्यर्थः अतएव विमतां वैतालीयविरुद्धां दधाति विलक्षण इत्येव विशेषलक्षणे वैतालीयस्याशेषं सम
स्तलक्षणं यस्यास्तादृशी उदीच्यवृत्तिर्नाम अयुक्तृतीयेनोदीच्यवृत्तिः पूर्वैःसाकंयुगितिचानुवर्तते अयुक्पादेतृतीयेनलकारेणसा
कंयदि पूर्वो द्वितीयोयुक्तस्तदा तदुदीच्यवृत्तिर्नाम अथात्रोदीच्यजनानामाचरणमाह विलोचनेति यावृत्तिः गुणश्रितां गुणैः शौ
र्यौदार्यादिभिर्निश्रितानां दृशौ विलोचनस्यकलां शिल्पं चातुर्यमिति यावत् तदेव विषं गरलं धारयति कीदृशी अगतां नविद्यते ग
तं चापलरूपं गमनं यत्र तादृशीं स्फारितामित्यर्थः विमतां साधुजनानां संमतां अतएव विलक्षणा विरुद्धलक्षणसा उदीच्यानां वृ
त्तिर्वर्तनं वैतालीयपैशाचं अशेषसमग्रं लक्षणं चिन्हं यस्यां तादृशी पिशाचनेत्रकौशलमपि दुयाद्विगुणान्नश्रयति विषवदनिष्ट
साधननिमिषनया विस्फारितं साधुजनासंमतं विरुद्धचिन्हं चेति नतुल्यमुदीच्यानामाचरणमित्यर्थः अतएव खशाः प्रत्यक्षराक्षसाइति

विलोचनकलां गुणाश्रितां विषमगतां विमतां दधातिया उदीच्यवृत्ति विलक्षणा वैतालीया शेषलक्षणा १६ गुण
स्थलेयद्विलोपेनेभ्रूतलेर्णवर्जलेन संयुते प्रवृत्तकं पिंगलेन तद्विषमयुक्चरणयोः क्रमास्मृतं १७

ले अथेतरं तन्द्रेदमाह गुणस्थेति क्रमाद्विषमयुक्चरणयोः विषमचरणे विलोचने द्वितीयलकारे गुणस्थला तृतीयस्थानस्थित लकारे
णसहसंयुते सति समचरणेतुभ्रूतले पंचमलकारे र्णवजले चतुर्थस्थानजातलकारेण सहसंयुते सति इयत्परिमाणं तद्वैता
लीयं पिंगलेनाचार्येण प्रवृत्तकंनामस्मृतं आभ्यां युगपत्प्रवृत्तकं आभ्यां प्राच्यवृत्ति उदीच्यवृत्ति लक्षणाभ्यां युगपत्प्रवृत्ताभ्यामुपलक्षि
तं प्रवृत्तकंनामवैतालीयं युक्पादे पंचमेन सह पूर्वैः संगतः अयुक्पादे तृतीयेन सह पूर्वैः संगत इतिलक्षणाभ्यामित्यर्थः अथात्र क
दाचिद्गरुडेन क्रोडीकृतस्य पिंगलनागस्य चरितमाह गुणस्थलइति पिंगलेन नागेनार्णवजलेन समुद्रपयसा संयुते पतितो व्याप्तेति
भूतले १ पृथ्वीप्रदेशे कस्मिंश्चिद्वीपइत्यर्थः तथाभूतेगुणस्थले प्रसारविद्याहृपस्य प्रदर्शनस्थलं तत्र यत्स्वचरणयोः प्रवृत्तकं प्रवर्तनं संचरणमि

यावत् तत्स्मृतं चिंतितं कीदृशे गुणस्थले विलोचने वेगेरु
डस्य लोचनमत्र गरुडनेत्र विषयीभूते इत्यर्थः किंभूतं प्रवृत्तकं
विषमे संकटकाले युज्यते इति युक् योग्यमित्यर्थः १७

८

अथापरंतद्विशेषमाह इमा इति यस्य पदे पदे चतुर्षु पादेषु इमाः प्रवृत्तकविषमपादस्थाः मनुकलाश्चतुर्दशमात्राः स्युस्तासु समलः परगौरवास
ह इत्यस्यापवादेन गुणास्त... तीयमात्रालोचनं द्वितीयमात्रामाश्रितः स्यात् प्रकृतिर्वैतालीयं तदनतिक्रम्य शेषलक्षणं यस्याः सा राल्लु
गित्यादिशेषं यथाश्रा समे वेत्यर्थः तादृशी चारुहासिनी नाम हृदि स्फुरति अयुक्चारुहासिनी यस्य सर्वे पादाः प्रवृत्तकायुक्पादल
क्षणवंतस्तद्वैतालीयं चारुहासिनी नाम किं तल्लक्षणं चतुर्दशमात्रावत्वं तन्नयेन पूर्वस्य योगः अथात्र कश्चित्कोऽपि चतुरो हृद्यास्मर
न्नाह इमामिति कलाः गानन्दयादयः पदे पदे इमामनुगताः संति किंच अस्यालोचनश्रितागुणश्चापलदैर्घ्यादिर्लसति प्रकृतिः सौंदर्या
दिस्वभावस्तमनतिक्रम्य शेषलक्षणं अविशिष्टांगलक्षणं यस्यास्तादृशी चारुहासिनी यं मम हृदि स्फुरति १८ अथान्यमपि तद्विशे
षमाह जलधीति यद्वैतालीयं छंदः सकलतः सकलेषु पादेषु समपादे यत्साध्याद्वृत्तिलक्षणं तत्तुल्यं यदि सकलपादेषु लक्षणं स्यात्तदा
साऽपरांतिकानामबुधैर्वर्ण्यते तत्किं लक्षणमत आह यत इति यत्र जलनिधिश्चतुर्थं भूतं पंचमं चलं मात्रा ते उभे संगते मिश्रिते स्यातां

इमामनुकलाः पदे पदे गुणोल्लसति लोचनाश्रितः यथाप्रकृतिशेषलक्षणा हृदि स्फुरति चारुहासिनी १८ जलधिभूतले सं
गते यतो जनकलाच्युता वर्णवृत्ततः सकलतः समपाद्यवृत्तिवद्दिगपरांतिकावर्ण्यते बुधैः १९ इति वैतालीयवर्गः

चतुर्थपंचमीभ्यां मेको गुरुः स्यादित्यर्थः कलाः षोडश मात्रा इति प्रकरणाल्लभ्यते कलाच्युस्याच्चत्वावा जने ति संबोधनं कीदृशी
वर्णवृत्ततो वर्णवृत्ताच्युताऽपगता इदं विशेषणं तु मूलोदाहरणं समानाक्षरपादमिति वर्णवृत्तशंकानिरासार्थं दिगिति दिश्यात्र प्रदर्शनं
लक्षणस्येत्यर्थः तेन शेषलक्षणं राल्लुगित्यादि वैतालीयवद्बोध्यं युगपरांतिका प्रवृत्तकस्य समपादलक्षणयुक्तेश्चतुर्भिः पादैरपरांतिका
नाम किं तद्युग्लक्षणं षोडशमात्रात्वं पंचमेन पूर्वस्य योगः षष्ठ्या मिश्रणं प्रयोगश्चेति अथात्र पाश्चात्यजनानामाचरणमाह
जलधीति यतो यत्र जलधिः पश्चिमसागरो भूतलं च ते उभे संगते संमिलिते जनानां विद्या कल वर्णाचरणं तच्युता बहिर्भूताः यवन
त्वात्तेषां ब्राह्मणाद्याचरणं नास्तीत्यर्थः समासवीप्राचानां वृत्तिर्वर्तनं मांसाशनादि तत्तुल्याऽपरा पश्चिमा दिक् दिक्शब्देन तत्रत्यज
नाचरणं लक्ष्यते कीदृशी दिक् अंतिका अंत्यपर्यायात् अंत्यजः शूद्रास्तद्वार्थकः दिशोल्युल्लें तु स्त्रियां दिप् रिस्पंदापेक्षया ई इक् पाश्चात्य

स

जनाचरणं दृश्येवं प्रतीतेन तु सर्वकोपालकोलितमस्माभिः
१९ इति वैतालीयपरिच्छेदाः वैतालीयाधिकारो विवरणं

अथमात्रासमपाधिकार आरभ्यते मात्रासमकलानाम्निछंदसिवसवोष्टौ द्विगुणाः षोडश अधिकारान्मात्राइतिलभ्यते पादइतिच तेनषो
डशमात्राः पादियदिसुसेषामिति मात्रा पर्यायाणं लानां परामर्शः तेषां लानामंत्येसावयवे गुरुत्वनियमाद्वाभ्यां मात्राभ्यामेको गुरुर्नियमे
नभवेदित्यर्थः अंककलानवमीमात्रा अन्यः पूर्वोत्तराभ्यां विरलाऽसंस्पृष्टैवभवेत् इतिछंदः शास्त्रवेत्तारोविदास्तत्रार्थज्ञानेवदंति हिप्र
सिद्धं मनाद्विवैसवोमात्रासमकलत्वमः वैतालीयसूत्रात्पादइत्यनुवर्ततेल इतिलुमहाधिकारः तथाचयत्रपादेगंताः गुर्वंताः सं
तः षोडशलाभवंति तन्मात्रासमकं नाम अंते द्वाभ्यामेको गुरुर्नवमस्तुलएवेत्यर्थः यत्तत्रशेषेपरेणयुङ् साकमित्यनुवर्ततेनीयमिति
हलायुधसंज्ञितं वैतालीयमात्रासमकयोभिन्नाधिकारस्थलेन भिन्नोसर्गो चित्यात् शेषेपरेणयुगयोगनियमोहि वैतालीयो
त्सर्गः तद्विषये —— पंचमेनत्ततीयेनच पूर्वयोगोपवादइत्युक्तत्वात् इहतुशेषनियमाभावएवोत्सर्गस्तद्विषयएवह्यादशाञ्च

मात्रासमके द्विगुणावसवस्तेषामंते गुरुस्तानियता विरलोककलान्यनएव भवेदिति शणस्त्र विदोहिंविदंति
विदा २०

वानवासिकेत्यादिरपवाद इतिवक्ष्यमाणत्वात् उत्सर्गापवादयोः समानविषयत्वनियमात् अतएवजोन्लावेत्यांबुधेर्विश्लो
क इत्युक्तं वृत्तरत्नाकरे यद्यत्राप्यधिकारे सममात्रायाः पूर्वयोगोनिषिध्येत तर्हि विश्लोकस्य चतुर्थमात्रातोजोनसंभवेत् षष्ठी
सप्तम्यागुरौसतिहि नतसंभवइति दिक् गंतइत्यनेनगुरुत्वेसिद्धे पुनर्गंतग्रहणं गंतइत्यादिदृष्टिकगुरुत्वनिवृत्त्यर्थं तेनात्र द्वौल
कारौभेत्वा द्विमात्रिकोगुरुः क्षिप्तइति अथात्रसामुद्रिकशास्त्रीयलक्षणमाह मात्राजनन्यासमकस्वरूपेणसमानेपुरु
षसामीप्यस्तत्यर्थः द्विगुणावसवः अन्यापेक्षयाद्विगुणितानिरत्नानिभवेयुः अंतेपरिणामे तेषांरत्नानां नियमेनगोरवं
भवेत् नस्यांककलासुखचिन्हकौशलमेवान्यनस्तदितरस्मिन्विरला दुःप्रापाइत्येवं सामुद्रिकशास्त्रविदस्तच्छास्त्रज्ञा
नेनवदंति धन्योमातृमुखःसुतइत्यादिवचनात् २० श्रीरामःशरणंममेतिपरमोमंत्रोयमष्टाक्षरः श्रीरामायनमः

८

17

तस्यैवान्यं भेदमाह यत्रेति यस्मिन्मात्रासमके भूतः पंचमलकारो लघुः प्रसरति प्रयोगं प्राप्नोति नागोष्टमो लकारस्तथाभूतो लघु
रेव प्रसरति यद्वा हंसप्रचारो नवमलकारसंचारोपि ह्रस्वो लघुरित्यर्थः शेषं यथाप्राप्तं इति वृत्ते ईदृग्लक्षणे मात्रासमकवृत्ते तु चित्रानाम
प्रथाख्यातिः स्यात् चित्रा नवमश्च यस्य पंचमाष्टौ नवमश्चैते लकारा एवावतिष्ठेरन् शेषं यथाप्राप्तं तन्मात्रासमकं चित्रा नाम अथास्य क
स्यचित्प्रदेशे हेतुसंभवमाह यत्रेति यस्मिन्नोहे लघुरल्पोपि भूतो देवयोनिविशेषः प्रसरति चपुनर्नागः फणी तथाभूतस्तस्मा दृशः च
रति यत्र हे लोलत्पोपि यहंसप्रचारः शान्त्यादिदुष्टश्च हंसचरणं चेद्भवेदिति शेषः इति वृत्ते ईदृक् चरित्रे [illegible] हे चित्रा उक्ता ख्याति
मेवेत् २३ अथापरं तद्भेदमाह परेति यत्रांकं नवमं लकारं परे [illegible] तपातन्नाश्रितं तथा गुरुवदेति शेषं प्रत्युक्तिः अन्यत्र
लघुरेव नवमइ हनुगुरुता यो न संदिह्या दृति निःशंकपदस्यह प्रकृतिषोडशमात्रा येन पत्यं ज्ञात्वा तादृशं मात्रासमकमुपचित्रा नामधा

यत्र प्रसरति भूतो नागः प्रचरति च तथाभूतः ह्रस्वोपि चेद्धंससंचारश्चित्राप्रथातिर्निर्दिष्टोत्तेस्यात् २३ परसंस्पृष्टतया गु
रुमंकं बुधा प्रकृतिं निःशंके उपचित्रामवगच्छ विशालां ललितार्थविरमे गुरुशालां २४

मवगच्छ जानीहि कीदृशीं चरमे अत्यावयवे गुरुणा शालते ता दृशीं एतेन षोडशानां गुर्वंतत्वं मन्तृदितं विशालां ललितार्थामिति
विशेषणे ख्यावकं परयुक्तेनोपचित्रा नवमइत्यनुवर्त्तत तीययाविपरिणम्यते परयुक्तेन दशमेयुक्तेन नवमेनोभाभ्यामेकेन गुरु
णेत्यर्थः अयं कश्चित् खंडितां प्रति तदुक्तं मपकुर्वानः क्रीडाशालां प्रवेशयत्याह परेति हे मानिनि मम प्रकृतिं स्वभावं शिष्टाचरणादि
रूपं ज्ञात्वा परया अन्यया संयुक्तत्वेन यो कोन खक्षतादिरूपः सामयुगमल्पं निःशंके कथय धूर्त्तस्वभावस्येदं कमी हं तु साधुप्रकृति
मिमेदं न नखक्षतादि किंतु बदरफलादीनि विचिन्वतः कंटकादिभिः क्षतानि भवेयुरिति भावः अतो गुरुं स्रक्चंदनादिसंभारेण
गुरुं क्रीडाशालां अवशय्यादि सज्जीकरणेन पालय गच्छ तां प्राप्नुहि रमेहं विहरिष्ये कीदृशीं विशालां पृथुलां विभिः शुकादि
भिर्युक्तां ता दृशीं ललितार्थां नरम्यनियत्यां नथाभूतां चेतिस्वविशेषणसमुच्चययो नकः यद्वा मे ममागरुधूपितां शालां उपचित्रादि विशे

मो

लघुरपि ९ वदे २

प्र

प्र २

सं

अथेतरं तत्प्रभेदमाह यदतीतेति अतीतेषु मात्रासमकादिपंचसु छंदःसु कृतानि यानि विविधानि पंचलक्ष्माणि लक्षणानि तैर्युते युक्ते मात्रासमादिचरणैः पंचछंदसां मध्ये यैः कैश्चित्पादैः कलितं रचितं यच्छंदो विलसति तत्पादाकुलकं नाम लोकः छंदोभिज्ञजनः गच्छति जानाति कीदृशं नानाऽनेकाः कलनाः प्रकारा अत्रेति बहुप्रकारकमित्यर्थः अस्मिन्श्लोके प्रथमे द्वितीये च पादे चित्रायालक्षणं तृतीये विश्लोकस्य चतुर्थे उपचित्रायाः एवमन्येषां पादसंकरेण पर्यायेण विपर्ययेण च बहुभेदाः स्वयमूह्याः एभिः पादाकुलकं एषां पंचानां मध्ये यैः कैश्चिदपि चतुर्भिः पादैर्मात्रासमकं पादाकुलकं नाम अथेह कश्चिदारब्धकर्मानुसारिणी वासना प्राणिनामनेकयोनिसंसृतिकारिणीत्याह यदतीतेति अतीतानि प्राग्जन्मसु यतीतानि कृतानि अर्जितानि अर्थात्कर्माणीति लभ्यन्ते तेषां नानाविधानि लक्ष्माणि शरीरसुखदुःखा

यदतीनकृतविविधलक्ष्मयुतैर्मात्रासमादिचरणैंः कलितं छंदो विलसति नानाकलनं गच्छति लोकः पादाकुलकं २५

त्मकचिन्हानि तैर्युते सासंबद्धैरित्यर्थः तादृशैः समादिचरणैः समानि स्वसदृशानि स्वोचितानीति यावत् आदिशब्दाद्विषमाणि स्वानुचितानि विषमाण्यपि संगृह्यंते तादृशानि यानि चरणान्याचरणानि प्रारब्धककर्माणीत्यर्थः तैः करणभूतैः मात्रांतःकरणावच्छिन्नप्रमात्रा कलितं कल्पितं छंदो वासनात्मको भिलाषा यद्यतो विलसति सुखदुःखात्मकविषये प्रसरति ततो लोकः प्राणिजनः पातृगर्भस्थपवनात् आकुलेयथास्यात्तथा नानाकलनमनेकयोनिसंसरणं गच्छति प्राप्नोति अयंभावः प्राग्जन्मकृतकर्मफलावयवीभूतशरीरसंबद्धैः प्रारब्धैः कृतात्मातु यासदसद्वासनी भा यते सैव तस्य नानायोनिगर्भस्थपवनव्याकुलायमुसत्तो कारणमिति २५ इति परीक्षायां मात्रासमकाधिकारः

पिंगला

अथ गीत्यार्याधिकारमाह द्विगुणितेति द्वाभ्यां गुणिता गजा अष्टौ षोडशेत्यर्थः मात्राधिकाराल्लाः इति लभ्यते ते षां गतिः संचारो यत्र अतिशयितालघूनां तति र्विस्तारो यत्र षोडशमात्रा लघुरूपा यत्रेत्यर्थः तादृशं पदं पादं यत्र छंदो व तिधारयतीति यावत् तत्र गतरयेति हल्वर्णवति पदे सति विकसति स्फुटी भवति गतरयेति वर्णेषु कारउच्चारणे धी गतयुरयेति स्थिते यकारलोपेन गतरयेत्यत्र पंचहलां निर्देशः सिध्यति तदंतर्गताक्षराणांनामनिर्देशेन प्रहेलिकया त्र छंदसि सर्वलघु निगुरुवर्णत्रयात्मकं नाम प्रवेशयितुमसंभाव्यमिति गम्यते इहास्मिं छंदसि कृते सति श्रवणस्य सु खं मृदु शब्दजन्यं धयपिब तदिति तदेतत् छंदो नामकिमुकिंस्यात् कलयजानीहि प्रश्नेलोट् मनसि रचय प्रथमतो यथोक्तहल्वर्णेषु ककारादीकाराकारोकारेत्यज्वर्णत्रयव्यवधानेन वर्णरचनां कुरु बुधहे प्राज्ञ तदुक्तं

द्विगुणितगजगतिपदमतिलघुनति पदवति विकसति गतरयवति सति श्रुतिसुखमिह धय किमु तदि

ति कलय निजमनसि रचय तदनु बुध कथय २७

तः पश्चात्तु गीत्यार्येति नाम कथयेत्यर्थः गीत्यार्यालः द्विर्वसवइतिवर्त्तते यत्र पादे षोडशलकाराः स्युः सा गीत्या र्यानाम जातिः महाधिकाराल्लः इति वर्त्तमाने पुनर्लग्रहणं द्विमात्रकनिवृत्त्यर्थं तेनात्र सर्वेलघवः स्युः अथ कस्याश्चिद् गजगामिन्याश्चरणस्थभूषणनाम प्रहेलिकया कश्चित् कंचित् पृच्छति द्विगुणितेति द्विगुणित ग शरीरमानेन तरगजादधिक स्तादृशो योगजो हस्ती तस्य गतिर्गमनमिव गतिरस्यास्तादृश्याः कस्याश्चित्सद् चरणं अवतिपालयति तत्किमु इति कलय जानीहीत्यन्वयः कीदृशं पदं अतिशयेन लघुस्तति विस्तारो यस्य तत्

वसुनि कर्णसुखं धयानभव हे बुध

यत्र

पद्दसुग तंगमंततस्परयोवेगाः सद्दति वरसोस विकसतिस्फुटाभवति मृगणलोलोसिमावः इदं सोतः तदद्दसुनः स्व इदिकावकावकमाव कल पूननः कथ य २१

२१

अथ गीत्यार्यामेदमाह प्रथमेति इहास्यां प्रथमदलं प्रथमार्द्धं सकलं सर्वमपि सुकलितलघुकलिकं सुष्ठु विरचितालघु
रूपाः कलिकामात्रा अस्मिंस्तादृशं सम्यक् उचितमित्येवमनुकलय जानीहि अन्यार्द्धं उत्तरार्द्धं सर्वाद्या त्रिंशन्मा
त्रा रूपा गुरवः गुरुवर्णमयी यादीपेल्भायात् से यं गीत्यार्या चूडाज्योतिर्नाम शिखापदमेतच्छंदसि प्रवेशयितुम
शक्यमिति तत्पर्याय चूडापदोक्तिः दीपे दिशिश्यन्विकरणस्यापि दीपेर्भ्वादेरत्वकरणछघूसंभवः अनुदात्तल
लक्षणस्यागमनेन पदस्यानित्यत्वात्परस्मैपदं शिखाविपर्यस्ताद्धी सर्वलघुकादद्धी द्विपर्यस्तं सर्वगुरुकमर्द्धं य
स्याः सा गीत्यार्या शिखानाम यत्रार्द्धं सर्वलघुकं अर्द्धं च सर्वगुरुकमित्यर्थः लः ए वेश्के ज्योतिः एवेश्केदर्धभागः

प्रथदलमिह सकलमपि सुकलितलघुकलितमिति समुचितमनुकलय अन्यार्द्धं यास वागुर्व शेयं दीपज्योति
र्भद्रा २७

लघुद्वात्रिंशल्लघुकौ भवेद्गु नरस्तु सर्वगुरुः षोडशगुरुकः सा शिखाज्योतिर्नाम अथ कश्चित्कं चित्सतिं अनुक्तिं तां तरंगा
गांस्थूला धोभागतया चेषत्प्रकाशो जीर्णैक पीसवर्तिकां दीपकलिकां यथोचितप्रकाशां कुर्वित्याह प्रथमेति इह
दीपे ऊर्ध्वभागस्य प्राथम्य विवक्षया प्रथमदलमूर्ध्वांशकलं सकलमपि सुतरां कलिताज्ञाता लघुः सूक्ष्मा कलिका
यस्य तथाभूतमस्ति दीपे याज्योतिश्चूडासा न्यार्द्धं धोभागे सर्वागुर्वस्थूलाभ्रदिति हेतोः समुचितं यथोचितप्र
काशं अनुलक्ष्य कलय रचय नवीनकार्पासवर्तिकांकृत्वा दीपं प्रकाशयेति भावः २७ श्रीरामः शरणं मम
रामचंद्रतवपादपंकजं चिंतयामि भवबंधमुक्तये वंदितं सुरनरेंद्रमौलिभिर्ध्यायितं मनसि योगिभिः सदा १

अथतस्याएवभेदांतरमाह पूर्वार्द्धइति यापूर्वार्द्धेसर्वाद्वात्रिंशन्मात्रात्मिकागुर्वीगुरुवर्णाटीपेत अथानंतर
मपरंशकलंउत्तरार्द्धं सर्वमपिलघुतराःकलिताःकलायस्मिंस्तादृशंपरि विलसति उसंबोधनेसाचूडापद
पर्यायतयाशिखासौम्यानाम छायाशोभारूपेतिसावकं गर्भेसौम्या यस्याःपूर्वभागःसर्वगुरुश्रेउत्त

पूर्वार्द्धयासर्वागुवर्द्दीपेच्छायासौम्याचूडा अपराकलमपरमिह सकलमपिचलघुतरक
लितकलमुपरिविलसति २८

रसुसर्वलघुकस्तदासाशिखासौम्यानाम इयमेववृत्तरत्नाकरेऽनंगक्रीडेत्युक्ता अथकृतयथो
चितप्रकाशांदीपकलांवीक्ष्यकश्चिदाह पूर्वार्द्धइतिअधोभागे अपितिकृतप्रकाशानंतरंदीपयाशिखा
साछायाकांत्यासोरमलीया उपरिऊर्ध्वभागेकलिताविस्तनालघुतराकृशतराकलाऽस्मिंस्तादृश
मपरंशकलंविलसति अधश्चोपरि यथोचितंप्रकानइत्यर्थः २८

अपरं चतस्यामेदमाह शिखीति त्रिभिर्गुणिताः नवसंख्याकाः सप्तविंशतिर्विरला परस्परमसंसृष्टाः कलामात्राः यस्मिंस्ता
दृशं यद्दलं अर्द्धं तेन विरचिता कृता विततिर्विस्तारस्तस्य गतिः संचारस्तेन कलितं ज्ञातं मुखमाद्यमर्द्धं यस्यास्तादृशी ततः
पूर्वोद्दीप्तधिकोल्लसो लघुद्वयं दूरंप्राप्तं चरमं अन्त्यमर्द्धं बिभर्त्ति तथाभूता इहास्यां उभयं अर्द्धद्वयमपि विरतिगं विरतो अ
वसाने गोगुरुर्यस्मिंस्तादृशं शुद्धं यति प्रकाशते आद्येऽर्द्धे सप्तविंशतिर्लघवो गुरुरेकश्चान्ते द्वितीये तु एकोनत्रिंशल्लघवो
गुरुरेकश्चान्त इत्यर्थः न नद्येयं शिखा शिखापदपर्याया चूडिकानाम चूडिकेति प्रवेशयितुमशक्यत्वात् शिखाक्तिः अ
त एव वृत्तरत्नाकरे शिखैवोक्ता यत्तु तत्र शिखि गुणितदशलवादिना पूर्वार्द्धे ष्टाविंशतिर्लघवो गुरुरेकः पश्चार्द्धे त्रिंशल्ल
घवो गुरुश्चैकः इत्युक्तं तच्चिन्त्यं चूलिकैकोनत्रिंशदेकत्रिंशदन्ते ग शिखैवेत्यादि सत्वात् दधेग्रहल्लमत्र नर्त्तते यत्र प्रथमेऽर्द्धे ए
कोनत्रिंशन्मात्रा भवेति द्वितीये तु एकत्रिंशता पि चोक्ते लद्वयमपनीय गुरुः क्षिप्यते न चूलिकानाम अंतेगिति विशेषो पाद

शिखिगुणितनवविरलकलदलविरचितविततिगतिकलितमुखा अधिकललितचरममर्द्धमुभयमपि
विरतिग मिह तद्दुत्यति शिखा २८

नाद्न्येषां लघुत्वमाम्नातं सूत्रमिदमन्यथा पठं त्यन्ये चूलिकार्द्धमेकोनत्रिंशदन्ते गिति एतन्मते उभयोरपद्योः प्रत्येकमेको
नत्रिंशन्मात्रा गुर्वन्तास्युः युक्तश्चायं पाठः चूलिका समुदाहृता एकोनत्रिंशदन्ते गरूत्याग्नेयपुराणात् अस्या एवाभिरु
चिरेतिनामोक्तं वृत्तरत्नाकरे अस्मिन्पक्षे तु मूलश्लोके ललितपदं सुन्दरं परं इत्यभिनिपदं न पठनीयं अथेह पक्षे प्रसायरि
न्ध न्यस्तयारुरूपर्वापरभागामयूरस्य चूडा प्रस्तौति शिखीति शिखिना मयूरेण गुणिताः न्यस्ता नवविरलकलवद्दल
विरचितविततिः नवानूतना विरला प्रसृता तनया पलवाकलामागोस्यास्ता दृशं यद्दलं पक्षः शाकलच्छदयोर्दलमित्यमरः ग
तत्पक्षाच्छदः पत्रमित्यादि च तस्य विरचिता विततिर्विस्तारस्तेन यागतिर्न्नर्त्तगतिस्तया कलितं तरि यं मूर्त्ते मुखमयं यस्या
स्तादृशी यत्शिखामयूरचूडा उदयत्युन्नता भवति कीदृशी अधिकं यथातिशयं ललितं सुंदरं च न चरमं पश्चिमावयवं बि
भ्र तितादृशी इह चूडायां द्वयमपि पूर्वपश्चिमावय
वद्द्वयमपि विरतिं विश्रामे रतिं क्रीडां लीलामितियावत् ग
कृतिना हेऽश्मस्ती विशेषः इति गीत्यार्या विवरणं २८

छं॰ टि॰

नो च संख्यापरिज्ञानार्थं लाघवेनोपायमाहे केन १

इदानीं मात्राछंदस्सु गुरूणां लघूनां वर्णों छंदःकलाइति कलावर्णगुरुलघु पदेस्त्वत्तत्संख्यालक्ष्यते छंदःकला छंदो मात्रासंख्यां
कः हीनवर्णहीनोवर्णसंख्यांको यस्मात्ताहृशाः कार्याइति शेषः तत्रये कोः शिष्टाअवशिष्टास्तेऽकागुरवः गुरुसंख्यांको भवंति
इह छंदो मात्रासु अन्ये गुरुसंख्यांकातिरिक्ता मात्रासंख्यांकाः लघवो लघुसंख्यांकाः भवंति गुरुहीना गुरुसंख्यान्यूनाश्च
छंदोमात्रांकाइत्यनुषज्यते शिष्टा इति च वर्णाः वर्णसंख्यांको भवति यद्वा अन्येऽउच्यन्त इति शेषः गुरुहीनावर्णांकार्याः शिष्टा
लघवो भवंति गुरुहीनाश्छंदःकलाः कार्याः शिष्टावर्णा भवंतीति तदेतदद्भुतं अतिलघूपायेन ज्ञानबाहुल्यमाश्चर्यमित्य
र्थः तत्रयथास्मिन्नेव श्लोके आद्यपादे कति गुरवः कति वा लघवः कति च वर्णा इति प्रश्ने मात्रांकः १४ चतुर्दशतेषु वर्णांतः ८
अष्टौ हीनाः कृताः अवशिष्टाः षट् ६ गुरवः मात्रांके १४ चतुर्दशसु गुर्वंकः ६ तदतिरिक्तमात्रांकः २ द्वौ अयं लघुसंख्यांकः यद्वा
गुरुसंख्यांकः षट् ६ एतेन हीनो वर्णांकः ८ कृतशिष्टः २ अयं लघ्वंकः एवं मात्रांके चतुर्दशसु १४ गुर्वंकः ६ ऊनितः शिष्टा अष्टौ ८

छंदःकलाहीनवर्णा ये शिष्टा गुरवस्तु ते इहान्ये लघवो वर्णा गुरुहीना स्तदद्भुतं ३० इ वृत्तोक्तिरत्नाख्यकाव्येनारा
यणोदितेमात्रा वृत्तेषु सम्प्रार्थः सर्गपूर्णो द्वितीयकः ३१

अयं वर्णसंख्यांक एवमन्यत्रापस्तं साम्येन न समालं स्नेइति सा गुरुसंख्या भवति येन यावद्भिरक्षरैर्लौ छंदो मात्राणां ग्लो
क्षराणि संख्यासमसंख्याः न स्युरपि तु न्यूनसंख्या एव ग्लइत्यक्षराणि युच्यंते तेषां गुरुलघुरूपत्वात् अयमभिप्रायः आर्या
दिषु यावंतो मात्राउपदिष्टास्तावंत्यक्षराणि यथासंख्यया न पूर्यंते सा तत्र गुरुसंख्या वेदितव्या अवशिष्टा लघुसंख्या अन
योः संकलनया वर्णसंख्या चेति अथेह कस्मिंश्चिद्देशे वैदिकानां शिष्टत्वं गुरुत्वं च वैदिकानां तु लघुत्वं गौरवहीनत्वं चेत्या
श्चर्यमाह छंदःकलाभिः कृति भागे हीनाः अवैदिका इत्यर्थः तेन्वंते वर्णा ब्राह्मणादयस्त इह देशे शिष्टा इति गुरव इति
व्यवह्रियंत इति शेषः अन्ये तदितरे वैदिका इत्यर्थः ते वर्णा लघवो लघुमानाः गुरुहीनाः गौरवहीनाश्च व्यवह्रियंते तदेत
नारायणकुलोद्भव नारायणकृतौ रवकृतिरत्नोक्त्या विवृतौ सूत्रार्थप्रकृतौ सम्प्रार्थं संस्कृतोपरीक्षितिनाम्ना कृतो मात्राछंदोधिकारो

१२

25

अथ वर्णवृत्तं प्रस्तूयते तच्च सममर्द्धसमं विषमं चेति त्रिविधं तत्र समवृत्तलक्षणमाह संपदिति अत्र नामैकदेशे नामग्रहणमिति न्यायेन संपच्छब्देन समं पादो विपच्छब्देन विषमपादः परिभाष्यते यद्वृत्तं सर्वत्र चतुर्ष्वपि सम विषमपादेषु समानलक्षणेन लक्षितं तद्वृत्तमिह शास्त्रे समसर्वावयवत्वात्सममित्युच्यते सर्वत्रेति पृथग्ग्रहणं पादानां गोबलीवर्दन्यायेन पादज्ञाने लेशाभावेन सुखज्ञानकत्वात्सुखं अत एव सत्प्रशस्तं समान्यादिषु वृत्तेषु समत्वं स्थितं अथात्र सदाचरणमाह यदाचरणं संपत्तिषु विपत्तिषु च सर्वत्र देशे काले च समानचिह्नेन दृष्टं तदाचरणं सममिति शंसकथय मान्यादिषु गुर्वादिषु तस्थितं १ अर्द्धसमस्य लक्षणमाह संपद्गतमिति उपचित्रकं नाम वृत्तं तस्य वृत्तिर्वर्त्तनं विन्यास इति यावत् तेन तुल्यं तद्वृत्तं उपचित्रकवृत्तसदृशं वृत्तमर्द्धसममित्यर्थः अर्द्धेन समेन यत्रेति वृत्तेः शेषं स्पष्टं अथात्र सदा सदाचरणमाह संपद्गतमिति पादत्रयस्यार्थः स्पष्टः उपगतं चित्रकमालेख्य वृत्तिर्जीविका यस्य तादृशस्य शिल्पिन आचरणेन तुल्यं २ विषमस्य लक्षणमाह प्रत्यक्षमिति विलक्षणं

संपत्सु विपत्सु सर्वत्र तुल्यलक्षणलक्षितं समं तद्धि सद्वृत्तं शंस मान्यादिषु स्थितं १ संपद्गतलक्षणं यत्तु द्वितीये तु विपद्गतं वृत्तमर्द्धसमं तत्स्यादुपचित्रकवृत्तवत् २ प्रत्यक्षं लक्षणं यस्य प्रतिपादं विलक्षणं वृत्तं तद्विषमं वित्तं विद्धि चित्तोद्गतादिषु ३

विसदृशं सर्वावयवेभ्यो द्वाभ्यां विगतं समपत्वं यस्य तद्विषममिति वित्तं ख्यातं हे चित्त उद्गतादिषु वृत्तेषु स्थितं विषमलक्षणं विद्धि जानीहि ननु चैवं विषमवृत्तप्रस्तारभेदेषु विषमलक्षणाव्याप्तिः तथा हि चतुरक्षरसमवृत्तप्रस्तारे षोडशभेदास्तेषु प्रथमषष्ठैकादशषोडशानमाभेदान् विहाय ते द्वादशभेदास्तेष्वेकवर्णविषमभेदास्तेषु प्रतिचरणं विसदृशत्वाभावदूति चेन्न सत्यं हलायुधादिप्राचीनग्रंथकृतामनुरोधेनेदमुक्तं वस्तुतस्तु पादप्रतिपादमनुलक्ष्य समार्द्धसमाभ्यां विलक्षणमिति व्याख्येयं एवं चोद्गतादिवृत्तेषु वक्ष्यमाणविषमभेदेषु च लक्षणसंगतिरिति बोध्यं इह श्लोके वृत्तमिति पदमधिकृतं वेदितव्यं तेनेतोऽग्रे वक्ष्यमाणं छंदो जातं वृत्तमिति परिभाष्यते आर्यादिछंदो जातं तु जातिरिति प्राचां था एकदेशस्थिरा जाति वृत्ते गुरुलघुस्तमिति आर्यादिवृत्तमर्यादां स्फुरद्वर्णकलावृत्तमिति च मूलग्रंथस्तु वृत्तपद्यचरि

परिभाषा तदुक्तं ... छंदोजातिरिति सिद्धं

ये त्रिविधिकोशाद्दनाद्दमलोकेषु दः पयी पद्मी ... सामान्यावकलाभिप्रायेण ... वाभिप्रायेणेति अयमाशयः ... मिति प्रतिपादं प्रतिपादं विषमत्वं ... विलक्षं

अथांतिमसर्गे वक्ष्यमाणसमवृत्तभेदसंख्यायैवार्द्धसमवृत्तभेदसंख्याज्ञाने विषमवृत्तभेदसंख्याज्ञाने चोपायमाह खेरैवेति खेरै
भेदैः स्वपवनितसंख्यांकोपलक्षणानि समवृत्तभेदसंख्याकाः खेभेदैः समवृत्तभेदसंख्याकैर्हताः गुणिता अर्द्धसमवृत्तभेद
संख्याकाः समोपचिता भवंति राशिन्यूनाः समवृत्तभेदसंख्याकोराशिस्तेन न्यूनाः हीनाः कार्या एवमित्थं अर्द्धसमवृत्तभे
दसंख्याकाः खेभेदैः समवृत्तभेदसंख्याकैर्हताः गुणिताः शुद्धा निष्पद्यंते तेव समोपचिते रर्द्धसमवृत्तभेदसंख्याकैरेव ते चापि स
मोपचिता अर्द्धसमभेदसंख्याकाः गुणिताश्चेद्विषमाकाः समार्द्धसमोपचिता भवंति राशिन्यूनाश्च शुद्धा विषमभेदसंख्या
काः स्युः तत्र यथा गायत्रे छंदसि समवृत्तभेदसंख्यांकः चतुःषष्टिः ६४ वक्ष्यमाणप्रस्तारविधया सिद्धाः तस्यां चतुःषष्ट्यां चतुःषष्टि
गुणितायां चत्वारि सहस्राणि षण्णवतिश्चेति समोपचितसंख्या ४०९६ एतत्संख्यातो मूलराशिसंख्या ६४ चतुःषष्टिरपनेतव्या
शुद्धांका निष्पन्नाः ४०३२ चत्वारि सहस्राणि द्वात्रिंशदधिकानि इत्यर्द्धसमवृत्तभेदांकाः समोपचितार्द्धसमवृत्तसंख्या ४०९६

खेरैवभेदैः समवृत्तभेदा हता भवंत्यर्द्धसमस्य भेदाः ते रेव ते चापि हताश्च राशिन्यूनास्तु रेवं विषमस्य भेदाः ४

एतत्संख्ययैव गुणिताचेत्समार्द्धसमोपचिता जाता १६७७७२१६ राशिना ४०९६ एतत्संख्येन न्यूनाश्चेन्निष्पन्नांकाः को
टिरेका सप्तषष्टिर्लक्षाणि त्रिसप्ततिसहस्राणि विंशत्युत्तरशतं १६७७३१२० इयं शुद्धा विषमभेदसंख्या समं तावत्कुलं कृ
तमर्द्धसमं समभिति समवृत्तसंख्या तावत्कुलं कृतं तावत्संख्यया गुणितं अर्द्धसममर्द्धसंख्या भवति विषमं च अर्द्धसमं ता
वत्कुलं कृतं विषमसंख्या भवति रावन्यूनं तावत्कुलं कृतं अर्द्धसमं विषमं चरागरनमित्यर्थः तथा च शुद्धार्द्धसम
संख्या शुद्धविषमसंख्या च निष्पद्यते अथात्र सद्वृत्तानामपि कदाचित्समादादिनास्वीयजनेपेक्षयान्यासदसद्वृत्तत्वं त
द्वृत्ताचरत्वसमुच्चय वहिःप्रकारोऽसद्वृत्तत्वं च भवेदित्याह खेरिति समवृत्तभेदाः सदाचारपुरुषविशेषाः खेरैवभेदैः स्वीयैरे
वोपजाति कलाहताः स्वाचारपरिभ्रष्टाश्चेत्स्युस्तदा अर्द्धसमस्य सदसदाचारस्य भेदा भवंति यथोक्ताचारा अपि पुरु
षा स्वजनपेक्षयान्येन स्वाचारपरिभ्रष्टाः संतः सदसदाचारपुरुषकोटौ गण्या भवंतीत्यर्थः ते चापि सदसदाचाराश्च तैरेवस्व
जनेपि प्रयोगैर्बहुताः सदाचारपरिभ्रष्टाः संतोऽतः
अपि सदाचारपुरुषेषु गण्या भवंति ४
राशिन्यूनाः स्वसमुदायादपहृताः

१

त्रिविधं वृत्तं पुनः प्रत्येकं द्विविधं गलवृत्तं वर्णवृत्तं चेति ग्लाविति परिभाषापरस्थितिघटितं गलवृत्तं लौकिकाक्षर
घटितं वृत्तमित्यर्थः मादिवर्णघटितं वर्णवृत्तं तदेवं षोढा वृत्तेषु तावत्सम गलवृत्तान्याह ग्लोसमानिकेत्यादि
त्रिभिः ग्लाविति यत्र ग्लो गुरुलघु वर्णैस्त्रिभिर्गणः स्यात्तत्समानिकानाम वृत्तं तत्कियद्वारं नेत्याह शिक्षिता
गतिर्गजेन ग्लो परिभाषापरस्थिते क्षरे गजेनेत्यष्टसंख्यान्वयः तेनाष्टाक्षरपादे नानुष्टुप्छंदसा यस्याग
तिर्विन्यासप्रसृतिः शिक्षितेत्यर्थः गुरुलघ्वोरक्षरयोश्चतुरावृत्त्याष्टाक्षरपादं वृत्तं समानीति भावः समवृत्ते
सर्वत्र पादलक्षणेनैव वृत्तं लक्ष्यत इति इह पादग्रहणाभावेपि पादद्वित्वबोध्यं तामहं मुखेन निश्चलेन

ग्लो समानिकामुखेन शिक्षितागजेनेन चिंतयामिनां चिरेण चेतसापि निश्चरेण ५ श्रीराम

चेतसापि चिंतयामीत्यन्वयः श्लिनिसमानी पादस्यानुष्टुब्वक्रमित्यतोऽनुष्टुप्ग्रहणमपकृष्यते नाष्टाक्षरः
पादे सा वश्लिलकारैः प्रर्यते नावतामेव ग्रहणं वर्णवृत्तानुष्टुप्प्रकरणे समानीजौ ग्लाविति सैव पठितुं ये
ग्येसतिग्लितीत्यादिरिह पाठो वृत्ते स्ववर्णविभागं ज्ञापयति अथ कश्चित् चंद्रमुखीं गजगामिनीं स्मरन्ना
ह ग्लाविति यामुखेन ग्लो समानिका चंद्रसमाना यस्याश्च गतिर्गमनं गजेन शिक्षितं तामहं निश्चरेण तद्दे
कासक्तेन यानिश्चलेन अपिशब्दात्कायान्तरसंसर्गवशग्रस्तं चलेनापि चेतसा चिरकालं स्मरामि ५

पृ.८२

समस्तांतरमाह यदेनदिति हे शिष्य अक्षराष्टकं यदेतच्छंदः सामान्यमनुष्टुप् तत्र लघुलघुगुरुरित्यक्षरद्वयं क्रमेण मु
हुः पुनः पुनर्यावदष्टाक्षरसंख्यापूर्त्तिरिति प्राप्नोति एतदनुष्टुप्छंदः प्रमाणिकानामकं ईरितं पिंगलेन विशेषः स्फुरत्
प्रकाशमानं लिलिति प्रमाणीलका रगकाराभ्यां यद्वृत्तमनुष्टुभ् समाप्यते तत्प्रमाणीनाम मनोरा च मित्यन्ये अथ क
श्चित् कश्चिद्विज्ञोऽष्टाक्षरं मंत्रमुपदिशन्नाह यदेनदिति ॐ नमो नारायणायेति यदेतदक्षराष्टकं तत्र लघुद्वयं लग
जपासक्तो भवेत्यर्थः हे सितलक्ष्मण चरित्र तुभ्यं मयेरितं कीदृशं स्फुरत्प्रकाशमानं प्रेमाणं प्रमाला सायस्यां ता
दृशी अभिधानाम यस्य तादृशं प्रकाशात्मना युक्तमित्यर्थः एतन्मंत्रजपासक्तस्यात्मज्ञानं भवतीति भावः ६
अथापरं तद्विदमाह उदितेति यद्वसुवर्णमष्टाक्षरं क्रमरीत्या समान्यां गुरुर्लघुरिति पुनः २ प्रमाण्यां तु लघु गुरु
रिति पुनः २ या क्रमरीतिस्तद्विधुतो हीना वुदितं श्लोसमानीप्रमाण्यारूक्तौ यो गुरुर्लघुर्तौ कथंचित् तौ मापि प्रका

यदेतदक्षराष्टकं मुकुर्लगेतितन्नहे सुवृत्तमेनदीरितं स्फुरत्प्रमाणिकाभिधं ६ उदितश्लोक्रमरीत्या
विधुतावेति कथंचित् वसुवर्णक विबद्धं बहुधाभाति वितानं ७

रेण एति प्राप्नोति तद्वृत्तं वितानं नाम बहुधा बहुप्रकारैः शोभते यत्र गुरुद्वयं ततो लघुद्वयं द्वयं पुनः २ लघुद्व
यं गुरुद्वयमित्थं पुनः २ द्रुतिवा गुरुरेको द्वौ लघुद्रुतिवा लघुरेको द्वौ गुरू इति वा क्रमद्वयाद्येकप्रकारैर्वितानं कविभि
र्निबद्धं शोभत इत्यर्थः श्लोकोदाहरणं तु लघुद्वयगुरुद्वयक्रमघटितं स्वयमन्यान्यप्रत्यूह्यानि वितानमन्यत् समा
नीप्रमाणीभ्यामन्यदष्टाक्षरं नाम अन्यदितिब्रुवन्सूत्रकारो वितानस्यानेकप्रकारतां ज्ञापयति अन्यथा वितानं
गोला विसादि विशेषमेव ब्रूयात् अथ केनापि कविनास्वग्रहां गणेन निबद्धमुक्तौ चंद्रराहू इष्टा कश्चित्संदिह्यानि
श्चिनो उदितेति द्रुतिउदयं प्राप्तो यो श्लोकोऽष्टं द्रुतस्य या क्रमरीतिस्तयोपलक्षितं भुभ्रत्वात् कथंचित् महता क्लेशेन विधु

विधुतौ केंपे प्राप्नोति दृष्टवद्भूतया युवापि नो कथंचिच्चाल यितुं शक्यत इत्यर्थः वसुवर्णे शुक्लाघृष्टवर्णं रत्नवर्णे
वा बहुधाऽन्यकोटिव्यावर्त्तकबहुप्रकारैरित्यर्थः ७ इति
समग्रवृत्तवर्गविवरणं

अथार्द्धसमवृत्तानि विवक्षुर्वक्त्रप्रकरणमारभ्यते पुर इति हे धात्र शिथिलं दन्तिनीत्यधिदन्ति अष्टाक्षरेऽनुष्टुप्छन्दसि
तत्र वक्त्रं प्रयुङ्क्ष्वेत्यन्वयः आदेरित्यादौ विशेषाश्रवणात् श्लोकैकुपलक्षिते पादे इत्येकदेशोऽनुषज्यते यत्र पादे आदेः प्रथमाक्ष-
रात् पुरोऽग्रे नसनं सं नगणसगणमाधेहि न स्थापय युक्पादे समपादे तस्मादाद्यक्षरात् पुरः रं रगणं चकारान्नगणं सग-
णं च न स्थापय पादे वेदाच्चतुर्थाक्षरादग्रे यगणं स्थापय शेषाणां कामचारः ईदृशमष्टाक्षरं वक्त्रनामकमित्यर्थः
पादस्यानुष्टुब्वक्त्रं पादस्येत्ययमधिकार आसप्तमसमाप्तेः अनुष्टुब्वक्त्रमिति च पदं चतुरूर्ध्वोदाहरणाधिकृत्त्वं बोध्यं न
प्रथमात्स्नो वक्त्राधिकारपादस्य प्रथमाक्षरादग्रे सकारनकारौ न प्रयोक्तव्याविति प्रतिषेधार्थमित्थं द्वितीयचतुर्थयो-
रप्ययं अनयोः पादयोः प्रथमाक्षरादग्रे रोऽपि न प्रयोक्तव्यः इत्युपदेशः वान्यत्र विषमपादे सगणनगणाभ्यामन्य

पुरोऽधिदन्तिवक्त्रं त्वमादेशमानसमाधेहि तस्मान्नरं च युक्पादे प्रयुङ्क्ष्व चाग्रे वेदाद्यं ८ श्रीरामजी

त्तमगणादित्रिकपञ्चकमध्ये यत्किंचित्त्रिकं समपादे तु सनरेभ्योऽन्यत् मगणादित्रिकपञ्चकमध्ये यत्किंचित्त्रिकं प्रथमा-
क्षरादग्रे वा प्रयोक्तव्यं इदं तस्मन्नेशान्यमकर्तुं विशेषनिषेधे शेषाभ्यनुज्ञानेन गतार्थत्वात् यच्चतुर्थात् येति लुप्त-
प्रथमान्तं पादस्य चतुर्थाक्षरादग्रे यः प्रयोक्तव्यः अर्थादोगजाननेमनो निधेहि पश्चाद्युत्यादिकं पठ तेनैवा-
यं जेनस्तव रणेणागमं वादितं काश्चिच्छिष्यादिकमुपदिशति पुर इति हे धात्र पुरोऽधिकमादेशादिति आ-
रभ्य दन्ती गजस्तस्य वक्त्रमाननमिव वक्त्रमस्यास्तीति दन्तिवक्त्रो विनायकस्तस्मिन्नित्यधिदन्तिवक्त्रं मानसं म-
नस्त्वमाधेहि स्थापय तस्मादनन्तरं कृत्यादिकं प्रयुङ्क्ष्व च पुनस्तस्माद्भवेज्जन्मनो निधानात् युक्पादयो-
र्यनिजचरणेन रंगजादिकं पुरुषमाधेहि ८ रामचंद्रस्तवनामनि मिलं चिंतयामि भवबंधमुक्तये श्रीराम

निषिद्धेति ९

अथवक्त्रे विशेषमाह ४ न प्रथमात्स्नौ द्वितीयचतुर्थयोरश्नुतिनिषिद्धायेरसनास्तप्रयोगाणास्तेषामभावो यत्र
विषमेऽप्रथमेतृतीये च पादे श्नुतिलश्चतुर्थाक्षरादग्रे यभ्लस्य गणे विभजश्रुतिनाद्दश्रं यत्समवेदायनः द्विती
य चतुर्थपादस्य चतुर्थाक्षरादग्रे सज्जं सतं विद्यमानो जो यस्मिंस्तद्वक्त्रं पथ्यानाम भवेत् अयजानीहि
दृष्टांकितकटीति प्रश्लिष्टस्यरूपं पथ्यायुजोज् चतुर्थादितिवर्त्तते यत्र युजः समस्य पादस्य चतुर्थाक्षरा
दग्रे यस्या पद्यादोजः प्रयुज्यते तद्वक्त्रं पथ्यानाम अयशिष्टाचरणवतो वेदाध्ययनशीलस्य सुखं हिताय
भवति अतः सर्वथा तद्दृष्टव्यमिति कश्चित्कं चिदाह निषिद्धेति अभक्ष्यभक्षणादिना निषिद्धा दुष्टा या

निषिद्धरसनामावं विषमेश्नुतितोयमत्र समवेदायनः सज्जं वक्त्रं पथ्या यतद्भवेत् ६ राम

रसनाः सिद्धानदभावेऽस्मिन् विषमोदेशे काले वा श्नुतौ कर्णौ तोयं जलं बिभर्त्ति तादृक् भोजनादिसम
ये आचमनप्राप्त्यावाचामनानर्ह तथा श्रोत्राचमनं यो विधत्ते इत्यर्थः इदं च सदाचारस्योपलक्षणं
समः सर्वः सांगोपांगो वेदस्तदयनः सज्जतीति सज्जं षड्जगतौ पचाद्यच् सांगवेदपठनशीलमित्यर्थः
तादृशं कस्यचित्सुखं पथ्याय हिताय भवेत् अतस्तत्सुखमवश्यं दृष्टव्यमिति भावः ६ श्री राम ४
राम राम तव पादपंकजं चिंतयामि भवबंधमुक्तये वंदितं सुरनरेंद्रमौलिभिर्ध्यायितं मनसि योगिभिः सदा ६

९५

मतांतरेण पथ्यालक्षणमाह निषिद्धरसनाभवमिति निषिद्धानां रसनानाम भावोऽसंभवोऽस्मिन् संपदि समपादे श्रुति
तश्चतुर्थाक्षरादग्रे युक्तं पकाराक्षरमुक्तं यत्रेतिशेषः विपदि विषमपादे चतुर्थाक्षरादग्रे जपं जगणं पातितादृशं वक्त्रं पथ्या
नामेति कस्याप्याचार्यस्य मतं विपरीतेकीयं पूर्वोक्तलक्षणाद्विपरीता पथ्या भवतीत्येकीयमतं अयुक्पादे चतुर्थात् परो
जः प्रयोक्तव्यो युक्पादे तु य एवावतिष्ठते अथात्र संपत्तौ निषिद्धवस्तु न स्युर्के वेदं पठति च विपत्तौ विदेशाटने सति मार्गे वे
दजपंकशोतीति कस्यचित्साधोः सुखं प्रस्तोप्रस्तोति १० वक्त्रस्य भेदांतरमाह विपदब्धेरिति यदि पदब्धेर्विषमपाद
चतुर्थाक्षरादग्रेन नगणमपतिप्राप्नोति संपदब्धेः समपादे चतुर्थादग्रे यगणं यातिप्राप्नोति निषिद्धरसनाभानाम भावं
च धत्ते तद्वक्त्रं चपलानाम स्मेतिपादपूरणे चपलायुजोन् अयुजः पादस्य चतुर्थाक्षरादग्येन नगणेन भवति युक्पादे तु य

निषिद्धरसनाभावं संपदि श्रुतितो युक्तं विपदि श्रुतितो जपं वक्त्रं पथ्येति कस्यापि १० विप
दब्धेर्नमपति संपदब्धेः स्मयं याति धत्ते निषिद्धरसनाभावं तच्चपलावक्त्रं ११

एनावतिष्ठतेन प्रथमादितायुपदेशाः प्रवर्तंति तदा चपलानामवक्त्रमनुष्टुप् अथात्र कस्याश्चित्संचलायामुखं प्र
स्तौति विपदिति तत्र चपलायावक्त्रं विपदब्धेर्विपत्तिसागरस्य कर्मणः शेषत्वविवक्षायां षष्ठी नमयति प्रह्वीक
रोति यत्सुखं हृष्ट्वामहदुःखमप्यल्पं भवतीत्यर्थः संपत्तिसागराद्धेतोः स्मयं दुर्विषहदर्शनं प्राप्नोति यत्किंचिदास्वा
दनेन यत्किंचिद्दत्तानेन च निषिद्धजिह्वास्वभावं च धत्ते ११ रामरामत वपादपंकजं चिंतयामि भवबंधमुक्तये
वंदितं सुरनरेंद्रमौलिभिर्ध्यायितं मनसि योगिभिः सदा ११ माना रामो मत्पिता रामचंद्रः स्वामी रामो मत्सखा रा

पृ.त.३

अपरेसेन नमते विपुलां लक्षयति श्रुतेरिति श्रुतेश्चतुर्थाक्षरात्प्रथमादिनियमं यएवजएवववानएववेति नियमं नपा
लयन् नस्वीकुर्वन् नप्रथमास्ना वित्यादि निषेधं स्वीकुर्वन् सेनव आचार्यः सर्वाद्विभालां सर्वेषुपादेषुर्याद्विभा
सप्तमाक्षरत्रोभा नस्यांलोलघुरस्यांनाद्वत्रो विपुलांनाम भजति भूमिं एकां अन्यमते तु चतुर्थाङ्गादिनियमो यु
कृपादमात्रे सप्तमोलघुः सामाद्युपलक्षिताऽनेकविधा विपुलेतिवक्ष्यते विपुलायुग्लः सप्तमः अधिकारोयं
यचतुर्थादितिसर्वत्रयकारेप्राप्ते यद्यायुक्पादे सप्तमोलघुर्भवति तदा विपुलानाम नचैषा पथ्यायामंतर्भव
ति समेपादे सप्तमोलघुरवश्यमित्यनेन विपुलायाः सामान्यधर्मे प्रसुतेपि विषमेयापवादत्वेन विधीयमानस्य
भारे विशेषधर्मस्य वक्ष्यमाणत्वात् पथ्यायांतु नस्येनोक्तत्वात् सर्वतः सेवनस्य अस्यमते सर्वत श्चनुष्टुपा

श्रुतेर्नयादिनियमं निषेधं चैव पालयन् सर्वाद्विभालां विपुलां भूमिं भजति सैनवः १२

देषु सप्तमो लकारश्चेदुक्ता विपुलानाम एतन्मते चतुर्थीसरतोमयर सानामसंभव एवेतरेषां तु संभवे
तियथासंभवंप्रयोज्याः इति यादिनियमाभाव एव फलितः नप्रथमादिनिषेधस्तु बाधकाभावादावश्च्याधिकारं व
र्तते अपात्र सेनव मुनेराचरणं प्रस्तौति श्रुतेरिति वेदस्यनयः शास्त्रं वेदार्थप्रतिपादकं वेदांतादि आदिपदात्सु
राणादि तस्य नियमस्तदुक्तप्राणायामादिव्रतमित्यर्थस्तस्मात्सालयन् यथाविधि कुर्वन् च पुनः श्रुत्युक्तनिषेधं न
लंघितं तैनेनहिंस्यादित्यादि पालयन् सेनवो मुनिः सर्वाद्विभालां समस्तत्रोलत्रोभां लातितद्दलीं भूमिं प्राणायामाद्यु
पयुक्तं देशं यद्वा सर्वांसमरेताऽद्विभाऽकेप्रभा तां लाति आदत्ते ताद्दशीं भूमिं असंप्रज्ञातसमाधिरूपां भूमिकां भजति
विपुलां महतीं अद्वयोद्भुमशेलाकोद्

गणानां

अथ पिंगलमतेन विपुलां लक्षयति निषिद्धवर्णमिति प्रथमाक्षरान्निषिद्धं सनरवर्णं जहतीत्यजंती समाहितः सम्यक्स्थापितः मुनिस्थः
सप्तमाक्षरस्थानस्थो लो लघुरस्याः तथाविषमात् विषमपादस्थात् अब्धितश्चतुर्थाक्षरस्थे तरनोभात् भगणाद्धेतोः विपुलानाम छंदसः
श्रीः शोभामनोहरा जाता भाद्विपुलाभविपुलेति च गम्यते अन्त्योच सर्वतः सेनवस्येति निवृत्तं विपुलायुग्मलः सप्तमइति वर्तते चप
लायुजो नित्यतो ऽयुक्पूर्वहणमनुवर्तते यस्यायुक्पादे चतुर्थात्परतो यकारं बाधित्वा भरनतागणाश्चादनुक्तो मगणश्च विकल्पेन भवंति न
हावक्रं विपुला नाम तत्र भकारेणोदसुदाहरणादिभिरुदाहरिष्यते अथात्र लक्ष्म्या ऽऽसक्तिं स्थितिं च प्रस्तौति निषिद्धेति श्रीर्लक्ष्मी रब्धि
तः समुद्राज्जाता सती अभात् दीप्यतेस्म कीदृशात् विषमात् दुरधिगमात् कीदृशी श्रीः निषिद्धवर्णं अपचादिकं त्यजंती तथा स
म्यक्स्थापितं स्ववासार्थं मुनीनां स्थलं यया तादृशी ९३ रकारेण विपुलामाह संपद्द्वाविति या संपद्द्वौ समपादसप्तमाक्षरे लाघवे
न लघुत्ववता वर्णेनोपलक्षिता यत्र विपरथ्यो विषमपादचतुर्थात्पुरो ऽरगणश्चस्तत्र्थं यत्र च अवनीरस्तान अवन्याः प्रथमाक्षरात् तर

निषिद्धवर्णं जहती समाहितमुनिस्थला जाताब्धितो भाद्विषमा विपुला श्रीर्मनोरमा ९२ संपद्द्वौ लाघवेन विपद
थ्यो ऽपुरश्च पः अयवनीरस्तावमाति सतीर विपुलाकृतिः ९३

स्तारसनानभवे सुः सा जातिर्वा जातिः र विपुलेति तिशद्ध आकृतिर्नाम स्वरूपं यस्यास्तादृशी रविपुला नामेत्यर्थः सती प्रशस्ता न
नु वक्तृव्रतमितिवत्कुसुचितं ननु जातिरिति मात्राध्यायोक्तानामेव जातिरितिपरिभाषितत्वात् इति चेत् उच्यते नायं शास्त्रपरिभाषि
तो जातिशब्दः किंतु सामान्यवाची लौकिक आर्यादौ वृत्तशब्दवत् एवं च अन्त्योच विपुला नैकानेका जातिः समीरितेत्यस्य यंच
संगच्छते अथ नद्यादितीरस्थस्य विपुलाकारस्य वृक्षस्य वृत्तांतेन जालं प्रसुंके विराश्रितस्य कस्यचित्पुरुषस्य लक्षणे वे भवतयाम रि
यंती विपत्तिमाह संपदिति सप्रस्तुतः नीरेन धारिते टे विपुला स्थूला आकृतिः स्वरूपमस्य तादृशः को ऽपि द्रुमो वर्ततइ तिशेषः
कीदृशः संपद्द्वौ शाखादिसंपत्तिरूपे यो लेऽतिगुरु भवे चिवे भवद्व्यर्थः लाघवेन लघुनयोपलक्षितः क्षिप्रमेव लघुत्वं प्राप्स्यति
त्यर्थः तत्कुतः यतो ऽयं पदथ्यो ऽपुरश्चरः पुरस्सरः महती विपत्तिरेतदनुगामिनीत्यर्थः तदपि कुतः यतो नीरस्तानेनाव कृष्टा ऽवनीरस्तो

न गाहशीज्ञाति जेर्निस्मृतयाभृतः पापट्खाहि भोग
वान् जीवितकालो ऽस्यैवं प्रसूतपर्वे ६४

नकारेण विपुलामाह प्रथमाक्षरात्पुरतो विरसनं विगतारसनागणा अस्मिन् संपदि समपादे लघुः स्वरः सप्तमो यस्मिन् तथा ऽयुक्
श्रुते विषमपादे चतुर्थीदग्रे नललितं नगणेन सुंदरं यत् तादृशं वक्त्रं न विपुलेत्यभिधानमस्येति कथितं अपिशब्दः पूर्वो
क्तानां समुच्चये अथ यस्य सुखं वा चापरमेश्वरम जपत् सति विभवेपि यं कंचिद्याचमानं वेदाक्षरशून्यं असुंदरं चेति तन्नाम
नगरह्लीयादित्याह आद्याक्षरादिति आदेरक्षरात् ईश्वराद्विषयात् विगतानि वृत्तानि रसनावागिंद्रियं यस्य तथा संपन्ना
न गरह्लीयादित्याह आद्याक्षरादिति आदेरक्षरात् ईश्वराद्विषयात् विगतानि वृत्तारसनावागिंद्रियं यस्य तथा संपत्ना
वपि यस्य कस्यापि पुरतो याचनेन दीनतया लघुना वान् शब्दस्वरो यस्य श्रुतेर्वेदस्यायुक् अयुक्तं वेदाध्ययनयोगाभाव
दित्यर्थः नललितं अरम्यं तादृशं वक्त्रं विपुला विशाला प्रसिद्धा अभिधाना मास्य न भ्रमतं न भवेत् तादृशमुखस्य न
रस्य नाम कोपि गरह्लीयादित्यर्थः ९५ अथ तकारेण तामाह निषिध्येति आदेरक्षरात्पुरतो सौ येदीव सनरात् निषि

आद्यक्षरादिरसनं संपद्यपि लघुस्वरं अयुक्श्रुतेर्नललितं वक्त्रं न विपुलाभिधं ९५ निषिध्यादेः सारी
रः समाचललसत् स्थितिः सामान्यवेदान्तलधीरूढेति विपुलात तः ९६

ध्यवर्जायिला समपादस्याचलेसप्तमाक्षरे लेनलघुनासती प्रशस्तास्थितिरवस्थानं यस्यास्तादृशी समाद्न्यो विषमः
पादस्तस्य वेदश्चतुर्थाक्षरं तस्माद्ग्रे तलं तगणाभावस्तद्बुद्धिश्रेढुदेति ततस्तर्हि विपुला भवति यद्वा ततस्तकारात्स
विपुला न विपुलेत्यर्थः अथ कश्चित् वेदांतवाक्यानुरूपदिष्टादखंडब्रह्माकारावृत्तिर्भवतीति कंचिदाह निषिध्येति त
तः प्रसिद्धात् मान्येन गुरुणा सहितः स चासौ वेदस्तस्मादिवाक्यं तस्मात् विपुला ऽखंडानन्दधीर्ब्रह्माकारावृत्तिरुद
यति किं कृत्वा आदेरीश्वरस्य पुरउपरि ईश्वरे अधिष्ठानं इतियावत् सारीनुत्पत्तिमतः पृथिव्यादीन्निषिध्य नेहनाना
स्ति किंच नेत्यादिश्रुते कीदृशी समाएकाकारतया समानाः चलाष्टत्वंतरेण प्रतिहताल संती प्रकाशमाना स्थितिरस्याः

१७
५

धर्मे विषमेयच्युतेर्मता याचक्रिणा चोक्तां गीतां भजेम विपुलां परां

मकारेण विपुलामाह जहातीति याविपुलास्वं धर्मं सप्तमो लघुः प्रथमास्तादिनिषेधश्रेत्सामान्यधर्मं न जहाति यघस्याविषमे पादे श्रुतेष्वनुर्थाक्षरात्प्रेमतामगणाभावः चक्रिणा पिंगलनागेनचोक्तां गीयां गीञ्जो चेतिचकारेणोक्तं मगणरूपमंगमनमेवोस्यास्तां परामन्यां मविपुलां महं भजे अथास्यधर्मप्रतिपादकत्वेन श्रुतिवत्प्रमाणभूतां कृष्णोक्तगीतां वयं भावयेमेति कश्चित्तर्कं चिद्वक्ति जहातीति यतो हेतोः कौरवपांडुसेनयोर्मध्ये ऽवस्थितेनार्जुनेन भीष्मद्रोणादीनवलोक्य पितामहादिवधदुरितात्भीतेन कथमेतान्हन्यामहं न योत्स्य इत्युक्ते तत एव युधिष्ठिरादीनां विषमे संकटे

जहानियान स्वं धर्मं विषमे यच्छुतेर्मता याचक्रिणा चोक्तां गीतां भजेम विपुलां परां १७

सतिपागी नार्जुनं प्रति स्वमास्सतत्वं अशोच्यानन्वशोचस्त्वमित्यादिना न जहातिप्रतिपादयतीत्यर्थः तथा ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप कर्माणि प्रविभक्तानि प्रभावप्रभवैर्गुणैरित्यादिना चातुर्वर्ण्यस्य यथाक्रमं कर्मरूपं धर्मं च प्रतिपादयति यद्वा विषमे देशे काले वा स्वंधर्मं न जहाति न जह्यादिति यावक्तीति शेषः नतु क्ते श्रेयान्स्वधर्मो विगुण इत्यादि अंतोया श्रुतेर्वेदस्य मता संमता चक्रिणा श्रीकृष्णेनोक्तां गीतां परामुत्कृष्टां विपुलार्थां वयं भजेम १७ शोभसेहाधिकं वीरलतया कंठसक्तया विपरीत इवाकाशे सूर्यो नक्षत्रमालया १ रामं रामानुजं सीतां भरतं भरतानुजं सुग्रीवं वायुसूनुं च प्रणमामि पुनः २

विषम

अथ मंगलवृत्तानि विवक्षुः पदचतुरूर्ध्वप्रकरणं प्रक्रमते यच्चरण इत्यादि पंचभिः यस्य चरणे मुख्यः प्रथमो वसुवर्णो ऽष्टाक्षरवश्च कास्तिमत्
गुरुः गुरुः तस्य प्रथमस्याग्रेऽग्ने वर्तमानं पदं पादं द्वितीयं तृतीयं चतुर्थं चेत्यर्थः क्रमेण चतुश्चतुर्भिर्वर्णैर्वृद्धिः द्वितीयादि क्रमेण चतु
र्णां वर्णानां वृद्धिराधिक्यं भूषयति अलंकरोति प्रथमः पादोऽष्टाक्षरो द्वितीयो द्वादशाक्षरः तृतीयः षोडशाक्षरश्चतुर्थो विंश
त्यक्षरो यत्रेत्यर्थः सुक्रमेण वर्णवृद्धिर्भिर्भूषितिक्रमादिस्मृक्तं यत्र च गुरुलघवः स्वाधीनाः कवेरिच्छाधीनाः एते नाक्षराण्ये
व नावेति विवक्षितानीत्युक्तं तत्तादृशं छंदः पदचतुरूर्ध्वं नाम कं सिध्यतिनिष्पद्यते प्रतिपादं चतुर्वृध्या पदचतुरूर्ध्वं
चतुर्णामक्षराणां वृद्धिश्चतुर्वृद्धिः सर्वप्रकानत्वादनुष्टुभः प्रथमोऽष्टाक्षरः पाद इष्यते ततऊर्ध्वं प्रतिपादं चतुरक्षरवृध्या यद्वृत्तं नि
ष्पद्यते तत्पदचतुरूर्ध्वं नाम नन्वेवं द्वितीयादीनां प्रत्येकं चतुर्वृध्या द्वादशाक्षरत्वं त्रयाणामपि प्राप्नोति नैष दोषः इदानीं

यच्चरणे वसुवर्णश्च कास्तिमुख्यः क्रमात्तु गुरः गुरः पदं चतुर्वर्णवृद्धिर्भूषयति नित्यं स्वाधीना गुरुलघवः
पदचतुरूर्ध्वं सिध्यति छंदः १९ श्रनु

विषमस्योपक्रमात्प्रतिपादं लक्षणे वै लक्षणया वश्यं भावेन चतुर्वृध्येत्युनेनोत्तरोत्तरं चतुश्चतुर्वृद्धिरितिगम्यते अथात्र राजा
दिचरणस्य सामुद्रिकलक्षणस्य फलमाह यच्चरण इति यस्य पुरुषस्य चरणे वसुवर्णो रत्नवर्णः आरक्त इत्यर्थः मु
ख्यश्रेष्ठश्च कास्तिमत्तस्य पुरुषस्य पुरः २ चतुर्वीरं कालेऽ इत्यर्थः चतुर्णां वर्णानां ब्राह्मणादीनां वृद्धिः पदे वसति स्यात्तं
भूषयति ब्राह्मणादयः क्रमेण तं नित्यं चतुर्वीरं सेवंत इत्यर्थः गुरवो लघवोऽपि जनास्तस्य स्वाधीनाः तस्य छंदोऽभिला
षः पदचतुरूर्ध्वं पादन्यास चतुष्टयोपलक्षित कालो तरं शीघ्रमेव सिध्यतीत्यर्थः १९ श्रीरामः शरणं मम १९

२०

अथतस्यैवभेदमाह यदीति चेत्पदचतुरूर्ध्वे चतुरक्षरवर्द्धितं पूर्वोक्तं लघुगतिलघूनामेवगतिःसंचारोऽस्मिंस्तादृशं प्रचलतिप्रसरतितथाविरतिःपादावसाने तत्रपदस्थाने तस्मिन्गेनेयुगं गुरुद्वयं भवतिरक्षति प्रतिपादं लघवः सर्वेवर्णाअंत्यावर्ज्यंवगुरुद्वयंवर्णसंख्यातुपूर्ववदित्यर्थः तदाआसहितःपीडोआपीडोनामभवतिसइह शास्त्रे हि प्रसिद्धं परमन्यदितिपदचतुरूर्ध्वेविशेषणं तेनतस्यैवायंभेदइतिफलितोर्थः निजभासालघुवर्णस्वरूपयाशोभ पासुकुमारोमृदुशाद्यः अतिगतिरपि लघुवाहुल्यात्[illegible]घुगतिश्चपाठे गावंतआपीडः यत्रप्रतिपादमंतेगुरुद्वे इवेतांतस्यदचतुरूर्ध्वेमापीडोनाम अत्रगावंतएवेतिनियमइष्यते तेनशेषाणांलघुत्वं[illegible]नुज्ञातेभवति गांवे

यदिपदचतुरूर्ध्वेप्रचलतिलघुगतिसुकुमारः विरतिपदगयुगमवनिचनिजभासाऽऽसहितइहहि
भवतिपरम[illegible]तिर्गीतिरपिसपीडः २०

यांतेइतितुनेष्यतेशेषाणांकामचाराभ्यनुज्ञाप्रसंगात् अथसुकुमारस्यकस्यचित्सङ्ग्रामीयक्रमनेपिसतिपी डाभवतीतिकश्चित्कंचिदाह यदीति पूर्वार्द्धंस्पष्टं विरतिविश्रामस्तदर्थंपदयुगंहस्तावलंबनायोभयोःपदा तिद्वयंभवतिस्वसमीपस्थापयतिचयद्यपिनिजभासासहितोपिउज्ज्वलोपिअति इहदेशेयस्माद्धेतोपरमंगतिः परकीयबुध्याचलितवान् अतःसपीडःपीडासहितोभवति २० वाल्मीकिगिरिसंभूतारामांभोनिधिसं गता श्रीमद्रामायणीगंगापुनातिभुवनत्रयं २० रामंलक्ष्मणपूर्वजंरघुवरंसीतापतिंसुंदरं काकुत्स्थं

तिर
९६

अथ तस्यैव भेदांतरमाह सोयमिति यः पदमुखगुरुयुगः पदमुखे पादादौ गुरुद्वयं यस्य तादृशः ऊर्ध्वे गुरुद्वयानंतरं लघुतति लघुपरं
परां उत्ततिसम्यगर्थं उत्तापार्थसमर्थयोरिति गिरः अनुसरति प्राप्नोति वर्णसंख्यापूर्ववदित्याह पदचतुरूर्ध्वमितिनिजनियमतः प्रति
पादं च नु अन्नुवर्णवृद्धिरूपेण स्वीयनियमेनात्र प्रपतति प्राप्नोति सोयं प्रतीति पदेनयुतो युक्तः पीडः प्रतिपीड इत्यर्थः इति एतल्लक्षणवंतं तं प्रतिपीड
नामकं अनुभवतु भवानिति शेषः गावादौ चेदस्यापीडः गकारावादौ वचेद्भवतस्तु एनमपि पादानांतरातनू पदचतुरूर्ध्वप्रत्यापीडनाम
ह्यासह पीडः प्रतिपीड इति संज्ञकं भवति अत्रापि नियमेष्वपाणां लघुत्वं इहगावित्यनुवर्त्य गावेवर्गो न लुप्तो स इति परिभाषोपस्थिताश्च
त्वारो लघवः एवमुत्तरसूत्रेपि तथा च सूत्रद्वयेपि गावितिपुनः पुनर्ग्रहणं ज्ञापयति वर्णवृत्तेषु लोस इति नोपतिष्ठते तेन मात्राछंदः स्वेवत्तदु
पस्थितस्तु गुरुद्वैलिघु गणनीया विसर्पः संपद्यते ननु सुप्रप्रतिनामात्रार्थ इत्यादि निर्देशात्स्येत्र प्रतिनेति भाव्यं अत एवात्र प्रत्यापीड इत्येव नाम
हहलायुधः तत्कथं प्रतिपीड इति चेदुच्यते प्रतिशब्दस्याव्ययत्वेनालिंगत्वाच्छब्दादिपरतया स्त्रीपुंनपुंसकनिर्देशाः संगच्छंते तथा च सुप्रतिनेत्यादौ शब्दपरत
योपसर्गपरतया वा पदस्वरूपपरतया वा नपुंसकनिर्देशः प्रकृते तु शक्रप्रकृतिपरतया स्त्रीलिंगनिर्देशः यत्तु प्रत्यापीड इति नाम तच्चिंत्यं उत्तरसूत्रे तस्य
सोयं प्रतिपदयुतपीडः पदमुखगुरुयुगउत ऊर्ध्वेलघुततिमनुसरति च पदचतुरूर्ध्वं प्रपतति निजनियमत इति तम
नुभवतु २२
सत्वादेकाधिकारस्य योर्द्वयोरेकनाम्नोऽनुचितत्वात् किंच उत्तरसूत्रे इदमेव प्रत्यापीडग्रहणमनुवर्त्य गावादौ चेत्येवसूत्रयितव्ये पु
नः प्रत्यापीडग्रहणं ज्ञापयति पूर्वत्र प्रतिपीड इति एवं च गुरुद्वयांत आद्युपसृष्टः पीडः गुरुद्वयादिः प्रत्युपसृष्टः उभयत्र गुरुद्वय उभयोपसृष्ट इति
क्रमश्चोपपद्यते नन्वं प्रतिपीड इति कुतो नास्त्रत्र पदिति वाच्यं स्वतंत्रस्य मुने नियंतुमशक्यत्वात् नह्ययं दोषः प्रस्फुतशाप्यसौ बुध्यपरीक्षणार्थं दुर्बो
धपदबंधो गुणएवेति अथ सम्भोऽर्थः महाव्यवसायारंभे एकमेव हितोपदेष्टारं विदधीत न त्वनेकं अथोन्यप्रतिक्षणं दुःखावाप्तिलघुताच प्रतिज्ञाहा
निश्च भवेदिति कश्चित् कंचिद्राजनीतिमुपदिशति सोयमिति पदंव्यवसायस्तस्य मुखमारंभस्तत्र गुरुद्वयुगं हितोपदेष्टृद्वयं यस्य मंत्रिद्वयं यस्येति
यावत् युगमित्यनेकोपलक्षणं तेनानेकमंत्रिक इत्यर्थः सोयं पुरुषः प्रतिपदं प्रतिक्षणं युतपीडः युक्तदुःखो भवेत् उत्तापि ऊर्ध्वं व्यवसायो भावानं
तरं लघुततिं लघुत्वपरंपरां प्राप्नोति पदचतुरूर्ध्वमचिरेणैव निजनियमतः स्वकीयहानादिप्रतिज्ञातः च्युतो भवति एकेनमंत्रिणा यथादातुमुपदि
ष्टं तेनैवायं प्रतिजानीतेऽपरेणतु कालांतरे दातुं निषिध्यते तत्तयेवायं मन्यते एवमस्य प्रतिज्ञाहानिरिति भावः इत्येतादृशं पुरुषं तमुदाहृत्य

२३

अथान्यं तद्भेदमाह प्रत्येति कृशाः सर्वेषु तद्यापेक्षया ऽल्यास्ते च ते लघवश्चेषां गतिरस्मिंस्तथाभूतो यस्य वृत्तस्य पादः जा ताविकवचनं तेन चत्वारोऽपि पादास्तथाभूता इत्यर्थः लघुनामल्पत्वे हेतुमाह इहेति अस्मिन्वृत्ते मुखांते आद्ययोर्युगलं गुरुद्वयं तस्य भतिर्विधानबुद्धिः अजनिजाता पिंगलस्येति शेषः अंते च गुरुद्वयेन लघुद्वयमपि हृतमित्यर्थः अतो विवा तिस्तस्यां धनुःकोटाविवेति मुखांतद्वयस्योपमा धनुःकोटिर्यथोभयतः समाना कृशमध्यभागा तथेहाद्यंतावयवो गुरुविन्यासे मध्यभागे कृशत्वमर्थः पादवर्णसंख्यां पूर्ववदित्याह पादानामक्षराणि तेषां कलनं संख्यानं तत्करोतीति कृत् तादृशं पदं चतुरूर्ध्वी मपीह निपततिप्राप्नोति तदेतद्वृत्तं प्रत्यापदपरपीडः प्रत्याडिति पृथक् पदे ताभ्यां परः पीडः प्रत्यापीड इत्यर्थः प्रत्यापीडो गावो रोच चकारेणांत इत्यनुकृष्यते अत्रापि पूर्ववन्नियमस्तेन शेषाणां लघुत्वं तथा च यस्य पदचतुरूर्ध्वस्याद्यंतयोरेवग्र

प्रत्यापदपरपीडः कृशलघुगति रथयस्य अतो विरहयुगल भतिरजनि मुखांते पादाक्षरकलनकृद पि निपतति पदचतुरूर्ध्वं २२

प्रत्येकं गौ स्यातां न ह्यान त्वसौ प्रत्यापीडो नाम अथात्र चक्रवाकमिथुनस्य रात्रिस्थ विरहवृत्तांतमाह प्रत्यापदेति विहगयु गलं पक्षिविशेषचक्रवाकमिथुनं रजनिमुखांते प्रदोषांते पादस्याक्षरं निश्चलं कलनं निक्षेपणं तत्करोतीति कृत् तादृश मपि पदचतुरूर्ध्वी श्रियान्वेषणार्थगमने पादन्यासचतुष्टयादनंतरं नितरां पतति विरहवेदनावशात्स्खलतीत्यर्थः अत एवातिगमनशीलो यस्य पादश्चरणः पद्यते अनेनेति योगात्पक्षो वा कृशस्तनुः स चासौ लघुगतिर्मिं द्गमनस्या प्रत्यापदं प्र ति विपत्तिरात्रौ रात्रोपरागति शापितापीडास्य तादृशो स्तीति शेषः २२ श्रीरामः शरणं ममेति परमो मंत्रः २२

अथ पदचतुरूर्ध्वादीनां चतुर्णां प्रत्येकं भेदत्रयमाह द्वितीयादिभिरिति अब्धीनां चतुर्णां वर्णानां वृद्धिर्यस्मिंस्तादृशं पदं चतुरू-
र्ध्वादि हन्ते चंद्रः प्रथमश्चासौ पादः सचेति द्वितीयादिभिः द्वितीयतृतीयचतुर्थैः सह क्रमेण पर्यायेण न तु युगपत् व्यत्येति विपर्या-
सं प्राप्नोति तदा विबुधानां छंदोज्ञानां हृदया अपर्यायेण विपर्यासक्रमेण आदौ प्रथमतः प्रथमस्य द्वितीयेन व्यत्यये मंजरीना-
मछंदस्तदेति उत्पद्यते ततः प्रथमस्य तृतीयेन व्यत्यये लवली नामछंदस्तदेति पुनः पश्चात् प्रथमस्य चतुर्थेन व्यत्यये अमृ-
तधारानामेदेति अयमर्थः पदचतुरूर्ध्वे प्रथमः पादो द्वादशाक्षरो द्वितीयोऽष्टाक्षरः तृतीयः षोडशाक्षरः चतुर्थो विंशत्यक्षर-
स्तदा मंजरी नाम तस्मिन्नेव यदा प्रथमः षोडशाक्षरो द्वितीयो द्वादशाक्षरस्तृतीयोऽष्टाक्षरः चतुर्थो विंशत्यक्षरस्तदा
लवली नाम यदा तु तत्रैव प्रथमो विंशाक्षरो द्वितीयो द्वादशाक्षरस्तृतीयः षोडशाक्षरश्चतुर्थोऽष्टाक्षरस्तदामृतधारा

द्वितीयादिभिः क्रमेण व्यत्येति चेदब्धिवृद्धो चंद्रपादः तदा पर्यायेण इति विबुधानां हृदया अंकाप्यादौ छंदो
मंजरी लवली छंदः पुनरमृतधारा २३ इति विषमवृत्तपदचतुरूर्ध्ववर्गः

नाम एवमापीडादिष्वपि बोध्यं श्लोकोदाहरणं पदचतुरूर्ध्वमंजर्याः अत्रैव यथोक्तपादव्यत्ययेन लवली अमृतधारा
च बोध्या एवमापीडादिमंजर्याद्युदाहरणानि बोध्यानि प्रथमस्य विपर्यासे मंजरी लवल्यमृतधाराः श्लोकव्याख्ययैव व्या-
ख्याताः केचित्तु पदचतुरूर्ध्वस्यैव भेदत्रयमित्याहुः आपीडादीनामपीत्यपरे अथवा शुक्लप्रतिपदमारभ्य देवानां हृदि क्रमे-
ण सुधाकरकिरण बुभुक्षा भवतीत्याह द्वितीयादिभिरिति चंद्रपाद इति जातावेकवचनं चंद्रकिरणाश्चेत् अब्धिवृ-
द्धो अब्धेः समुद्रस्य वृद्धिरस्मात् स पूर्णिमा तिथोः सत्यां द्वितीयाया आदिः द्वितीयादिः प्रतिपत् बहुवचने प्रतिपदादयो य-
ह्यंते पुंश्चोलुङि वृद्धाः सप्तमी नोरितिवत् यद्वा पूर्णिमायां सत्यां तदपेक्षया प्रतिपदादयो द्वितीयादयो भवेति ताभिरि-

वृ. र.

लपवर्गेण तृतीया क्रमेणैकादिकला न्हासक्रमेण यास्यन्ति हसंति तदा विबुधानां अग्न्यादिदेवानां हृद्याज्जे आदौ प्रथमतः पर्यायेण।
ग्न्यादीनां स्वस्वावसरेण कापि रससामान्यविषयत्वेनानिर्वचनीया छंदःसुछा मंजरी च छंदोमंजरी उदितेति ततो लवलीछंद अक्षर
सिच्छा पुनः पश्चात् अमृतधारा सुधाकरकला सुधेच्छा भवति यथाप्रातर्मनुष्याणां कापि पद्मबुभुक्षा ततसंगवे इक्षुबुभुक्षा या मध्याह्न
सिच्छा ततोमध्याह्ने घृतेक्षुबुभुक्षायां मधुरेच्छा तथाऽग्न्यादीनामपि भवति अत्र लिचंद्रकलामेकैकामेकैकशः एकैकस्यां तिथौ पिबंतीति
भावः तदुक्तं सोमोत्पत्तिप्रकृतौ तं च सोमं प्रपूर्यं च पर्यायेणानुपूर्वशः प्रथमां पिबते वन्हिर्द्वितीयां पिबते रविः १ विश्वेदेवास्तृती
यां तु चतुर्थीं सलिलाधिपः पंचमीं तु वषट्कारः षष्ठीं पिबति वासवः २ सप्तमीमृषयो दिव्या अष्टमीमज एकपात् नवमीं कृष्ण

इति वृत्तोक्तिरत्नाकाव्येनारायणोदिते ग्लवृत्तेऽसोऽनुसंध्यार्थः सर्गस्तृतीयकः २४

पक्षस्य यमः प्राश्नाति वैकलां दशमीं पिबते वायुः पिबत्येकादशीमुमा द्वादशीं पितरः सर्वे समं प्राश्नंति भागशः त्रयो
दशीं धनाध्यक्षः कुबेरः पिबते कलां चतुर्दशीं पशुपतिः पंचदशीं प्रजापतिः ५ निष्पीतः कलावशेषश्चंद्रमा न प्रकाशा
ते इत्यादि २३ इति विषमग्लवृत्तपरचतुरूर्ध्ववर्गः ग्लवृत्तान्युपसंहरति इतीति २४ इति श्रीताराकुलोद्भ
वनारायणकृतौ निजवृत्तोक्तिरत्नविवृतौ परीक्षायां ख्यालौकिकाक्षरवृत्ताधिकारस्तृतीयोऽध्यायः ३ श्रीरामजी
आपदामपहर्तारं दातारं सर्वसंपदां लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहं २४ श्रीरामः शरणं मम इति परमे

अथेदानीमार्द्धविषमवृत्तेषु लक्षणीयेषु विषमस्य प्रकृतत्वाद्विषमवर्णवृत्तानि तावदाह सजसादित्यादि षड्भिः सजसाश्च योग
णाः लं लघुवर्णश्च यत्र तादृशं आदिं प्रथमं पादं इयात् प्राप्नुयात् यद्वृत्तमिति शेषः कीदृशमादिं अयतिं नास्ति यतिः पादान्ते विश्रा
मो यत्र तादृशं प्रथमपादं द्वितीयेन सह हे कीदृत्य पठेदित्यर्थः यस्य परं पदं द्वितीयपादः नसं नश्च सश्च तयोः समाहारः नगणसगण
वित्यर्थः जगौ जगणगुरू च इयात् यद्गुणपदं तृतीयपादं लाति स्वीकरोतीति गुणपदलः स चासौ भश्च नश्च तयोः समाहारः भनौ तस्मा
त् राजलगाः जगणलघुगुरवः परिशेषाश्चतुर्थचरणे सजसजाश्चत्वारो गणा यत्र गुरुः प्रिया चतुर्थ एव गुरुरन्ते प्रियो यस्यास्तादृशी उद्गता नाम
रुचिरा रमणीया विषमवृत्तेषु नत्वसादेतुत्त लक्षणमुच्यत इति तद्गुणाभावेपि तत्तत्पादलक्षणं बोध्यं उद्गतामेकतः स्जौ स्लौ न्सौ जौ भ्नौ
ज्लौ गस्जौ स्जौ ग यत्र प्रथमे पादे सजसलैर्दशाक्षराणि भवन्तीति द्वितीयेपि नसजगैर्दशैव तृतीये तु भनलगैरेकादश चतुर्थे पुनः सज
सजगैस्त्रयोदश न वृत्तमुद्गतानाम स्त्रेय यत्र गकारो लकारो वाश्रयते तत्र तेनैव वृत्तस्य पादः समाप्यते यत्र तु नतु भयं तत्र न तु भयं ते पादः

सजसाल्लमादिमयतिं च परपादमियान्नसंजगौ यद्गुणपदलभनाज्जलगाः रुचिरोद्गता सजसजा सगुरुप्रिया ३

उद्गतामिति किंभविभक्तिश्रवणान्न पठेदित्यध्याहार्यं एकत इति ल्यब्लोपे पंचमी उपस्थितमप्युपेलमित्युत आद्यमित्यपकृष्यते मया
द्यं पादं द्वितीयेन सहैकेन खापठेन्न तदीये पादे विश्रामे इत्यर्थः अथ यात्र केचिदाचार्या नीलोत्पलेति सजसेति गुरुप्रियाचार्याणि स्त्रीकाश्चिन् आ
दिमयतिं आद्यं जिनेन्द्रियं विधुं न संजगौ अपि तु गायति सैव कीदृशं विलुप्तं मुलुष्टं पदं स्थानं त्राणं वा यस्य पुनः कीदृशं इयां इः कामस्तं याति
तादृशं अत एव सजसालं जाजं यस्तत्सहितास जासा चासौ सोसालक्ष्मी तां लाति वक्षस्युपादत्ते तादृशं चस्तत्प्यर्थो जिनेन्द्रिय स काम स्वये
विरोधं द्योतयति ननु सकामस्य गानमनुचितमत आह यदित्यादि यस्य विष्णोर्गुणाः पावनत्वादयः पदं चरणं चैतेषां लभनात् लाभादेनो
रुचिरादिजलगा आपगा गंगा उद्गता उद्भूता कीदृशी सजसजा सह ईशेन जः सोऽपवर्गस्तस्य जउत्कर्षो यस्या इति गंगाया विशे
षणं गुरुकान्ता या वा त्रिगुणस्येश्वरस्य परे जस्तमः संकीर्तनेनापि सत्त्वप्रसादो भवतीत्यतो युक्तमेव मुमुक्षोस्तादृशं स्य संकीर्तनमिति

भाव: ३

अथोद्धतायाएवभेदमाह कविभिरिति यत्र यदीहहृत्तेस्तुतं यद्गुणपदं प्रशस्तं तृतीयपादइत्यर्थः तत्र तुरनभोरनभगणास्त्रयोगोगुरू
श्चेनदीर्यते तर्हि अहहाद्भुतं सौरभकं नाम वृत्तं भवति परमन्यत् प्रथमद्वितीयचतुर्थाइतिपादत्रयमपितावत्सा — कल्येनउद्धताहृत
वदंकिंतंलक्षितं कविभिश्छंदोभिज्ञैः अत्ररेणसहितोनस्तत्सहितोभइतिमध्यमपदलोपीसमासः यद्वा भइत्यस्य बहुवचनेभ
इतिरनयोरकारउच्चारणार्थः तथाचद्वंद्वसमासः एवमग्रेपन्यत्रोह्यं तृतीयस्यसौरभकेनेभिः तृतीयस्येतियुहणाद्धतायाएवा
न्यित्रयः पादागृह्यंते तृतीयस्यपादस्यस्थाने विशेषोरनभागुरुश्चेकइतिदशाक्षराणीति अथात्र परमानंदस्य दर्शितं संबोध्यतेति कवि
भिरिति हे हर कविभिर्व्यासादिभिस्तेन वपेगुणविलासितादयस्तेषां पदं स्थानं तत्र भोगः स्रक्चंदनादि सुखं नेयते न वर्ण्यते य
द्वा तेगुणउपवीनभेरवलाभौ वीस्वरूपस्तत्स्थाने तु भोगः सर्पशरीरं किंनेर्यतइतिकाकुः ततस्माद्भवतित्वयिसौरभकं तथाविख्यातत्वं
अहहाद्भुतं परमुदं परमानंदं गच्छतिप्राप्नोतीतिपरमुद्धतायावत्सत्तासास्मिन्नस्तीतिपरमुद्धतावत् ताद्दशमपिसौरभकं नावत्सा

कविभिस्तुतेगुणपदे तुयदिहरनभोगईर्यते तद्भवसहहसौरभकं परमुद्धतावदपितावदंतिकं २ कविभिस्तुतेगुण
पदेतुयदिहरचितंनसद्द्यं ललितमितिमतमेवहियेतः परमुद्धतावदपितावदंतिकं ३

कल्येनतेलक्षितं यद्यपितुच्छं विषयसुखं त्वयिनदृश्यते तथापिभीषणस्वरूपेण पतुतं परमानंदस्वरूपं वर्ण्यतइतिभावः २ अ
थतस्याभेदांतरमाह कविभिरिति छंदोभिज्ञैर्यद्यदीहहृत्तेस्तुतेगुणपदे प्रशस्ते तृतीयपादेनसद्द्यंनद्वयंसद्द्यं चरचितं भवेत्तर्हि
ललितमितिनामकं हृत्तं मतं सर्वेसंमतमेवेहिजानीहि यत्तोयत्र परं शेषचरणत्रयंउद्धतावत्ताकल्येनलक्षितं ललितंनौसोत्तृनी
यस्येतिवर्तते उद्धतायास्तृतीयस्यपादस्यस्थाने यदानौसौचगणाभवेयुस्तदाललितंनाम अथात्र हरमेवस्तौति कविभिस्तुतेस्ते
गुणानांसत्वादीनां पदंस्थानमधिष्ठानं तत्र सच्चिदानंदस्वरूपं तत्र सद्द्यंद्वैतंनचितं न कल्पितं किंत्वद्वैतमेव कल्पितंइतीदं मतं मद्वै
तमतं ललितमितिरदर्शनाम्नतादुरूपत्वान्मनोहरमतरक्षएहि आगच्छमच्चित्तइतिशेषः अद्वैतमेवकुतोमनोहरमित्यत आह यत

इत्यादियतोहेतोः परमानंदप्राप्तात्मभावस्तस्मिन्नस्तीति
साकल्येनतदित्यनुभवः अपिशब्दान्नेहनानास्तिकिंचनेत्याद्युप
निषत्प्रमाणंसमुच्चिनोति ३

२२

45

अथापरं विशेषमाह श्लोकादाविति श्लोकस्य पद्यस्यादौ प्रथमे पादे मसौ गणौ जपिज गणौ पिभौ भगणौ गौ द्वौ गुरू चेत्येवं गणाः प
तिताः स्युः परं पदं भा द्वितीयपादे शोभासनं जरंगमिति त्रयोदशाक्षराणि भजते तृतीयपादे द्विनसं द्वौ नौ द्विनं तत्स
हितं ससगणं विरचय्य चतुर्थपादे नजयं नश्च नश्च नश्चेति त्रयाणामेकशेषः नाश्च जश्च यश्चेत्येतेषां समाहारो नज
यं त्रीन् नगणान् जगणं यगणं चेत्यर्थः अवरक्षं एवमुपस्थितं एवं प्रचुपितं उपस्थितप्रचुपितं नाम वृत्तं भवति उपस्थितप्रचु
पितं पृथगाद्यम्सौ ज्भौ गौ स्नौ ज्नौ ग् नौ स्नौ जौ य् पृथगाद्यं प्रथमपादं द्वितीयेन पृथक् पठेत् ननु द्वितावदेकतः पठेत् अ
त्र तृतीयपादसमाप्तिः सगणेन भवति सकारस्य विभज्य पाठलिंगात् अथात्र द्विषत्सरोजिनमाभिचारिकजापकन्यस्तभा
रं निपयभोगानुरक्तं विजयेशिथिलोद्योगं कंचित्प्रभुमुपदिशति श्लोकादाविति पातितो नाशं वैनौ नाम सोतमः स्वभावो ना

श्लोकादाविति पातिनाम सोजपिभोगो भजते परमपदभासनं जरंगं द्विनसमिह विरचय्य प्र
पितनमवनजयमुपस्थितपूर्वं ४

हरो जपि भोगो जपी अभिचारजापको भोगः स्त्र्यादिसुखं तावुभौ श्लोकादौ यशोभक्षको अपयशस्कारकौ इत्य
र्थः इतिहेतोः त्वं जरंगं जेतृरंगं भज नेतव परं श्रेष्ठं पदं राज्यादिस्थानं तद्भासयतीति परमपदभासनं यद्वा परः शत्रुस्त
स्य भासनं भिनत्ति जेतृरंगविशेषणं द्विनसं द्विगुणितासायभिर्येनोच्चना सिकोयशस्वीत्यर्थः तादृशं एवमुपस्थितं
पश्चात्प्रचुपितं स्त्रानेर्गतं तादृशं अवनं जयं अवतीत्यवनः स चासौ जयश्च तं विरचय कुर्विति एवं तवैव जये उपस्थितमा
सीत् केनचित्तदीयभटेन स्वलाभहेतोर्नोशितो पुनर्जेतृभटान् धनादिनानुरंजयित्वा पयशस्तिरस्कारेणोच्चा
सनो भव जये उद्युक्तो भव परं तु जापकबलेन भटाद्यनुरंजना च्छिथिलोद्योगः सन् केवलं भोगासक्तो मा भूरिति भावः ४

वृ० व०

अथोपस्थितप्रचुपितस्येव भेदमाह पूर्वोक्तेदूति नवेऽव्यवहितोक्तत्वेन नूतने पूर्वोक्ते उपस्थितप्रचुपितेन यदा त्रिविक्रमपादं त्र
पाणांगणानां नन सानां विक्रमो विन्यासोऽस्मिंस्तादृशो यः पादस्तृतीयस्तं द्विगुणीकृतं नन सनन सवंतमुपलक्ष्य हरिरहिः
पिंगलो वर्द्धमानं नाम वृत्तमस्तौत् उपस्थितप्रचुपितस्य तृतीयपाद एव यथोक्तगणो द्विगुणश्चेद्यदा तदेव वर्द्धमानं नाम भवेदि
स्मपादस्मरणे कीदृशं दिविस्वर्लोके भुवि च ततं व्याप्तं प्रसिद्धमित्यर्थः वियति विगतायतिः पादमध्यविश्रामो यत्रेति वर्द्धमान
विशेषणे द्विगुणितोक्तत्वेन तृतीयपादस्य नवाक्षरतेन यतिसंभवशंकानिरासार्थं बलिशिरसीत्यादि अयं भावः त्रिविक्रमेण
पुरा बलिर्नागलोके पिहितः सन् तदा पिंगलनागेन तच्छिरसि वर्द्धापनाविषमेत तद्वृत्तं निहितं संभवेदत एव वर्द्धमानमिति यथार्थनामास्य

एवं

पूर्वोक्ते स्मयदानवे त्रिविक्रमपादं द्विगुणीकृतमुपलक्ष्य वर्द्धमानं दिवि भुवि वियति ततं बलिशिरसि च नि
हितं बलिनिलयतलमधिवसन् हरिरस्तौत् ५

तत्तीयपादस्य स्थाने यदेते षट्ग
तिकवेरुत्प्रेक्षेति वर्द्धमानं नोऽस्तौत्सो तृतीयस्येत्यनुवर्तने तस्मिन्नेवोपस्थितप्रचुपिते तृतीयपादस्य स्थाने यदे हे पूर्व हरिः शेषनागस्त्रिविक्र
मपादं श्रीवामनचरणमस्तौदित्यन्वयः कीदृशं स्मयदानवे वामनदर्शनेन विस्मयसहिते बलिदानवे त्रिपदपरिमिताभूमि
णं स्वसुसदा वर्द्धमानं नाम अथात्र विक्रमाचरित्रमाह पूर्वेति पूर्वनामा कश्चित्तत्संबोधनं हे पूर्व हरिः शेषनागस्त्रिविक्रमपादं
दीयतामिति वामनेनोक्ते सति द्विगुणीकृतं सद्यो द्विगुणमानं प्रापितं ततः क्रमेण वर्द्धमानं अत एव दिवि भुवि वियत्याकाशे
चनतं व्याप्तं तो बलिशिरसि निहितं स्थापितं किं कृत्वास्तौत् तादृशं तच्चरणं उपलक्ष्य बलिसहितं नागलोके स्वसमीपं दृष्ट्वा किं
भूतः बलिनिलयतलं पातालदेशं अधिवसन् ५ श्रीरामः शरणं ममेति परमो मंत्रोऽयमष्टाक्षरः श्रीराम

२३

47

अथ एकेन पादसंज्ञां गणसंज्ञां चाह पुण्येति पुण्यः पादज्ञानविभावने प्रदत्वात् सुरञ्जनकः समानाक्षरपाद
इति यावत् तादृशश्चासौ श्लोको वृत्तं समवृत्तमित्यर्थः तस्य तुर्योऽंशश्चतुर्थो भागः तेन संज्ञितया करणभूतेन पादः पादार्थ
कः शब्दः पादः पदं पत् चरण इत्यादिः लक्ष्यते संज्ञायते अत्र शास्त्रे अस्त्वर्थे आइति वाक्ये चतुर्विंशत्यक्षरायामायु
क्ताः षडक्षरश्चतुर्थो भागः पादः एवमुष्णिगादिद्रष्टव्यं पादश्चतुर्भाग इति सूत्रं लोकानुवादकं समवृत्तविषयमे
व समार्द्धसमविषममात्रावृत्तसाधारणीं पादसंज्ञामाह यथावृत्तेति यथाशब्दोऽनतिक्रमे वृत्तलक्षणार्थकेन वृत्तश
ब्देनाव्ययीभावः समः सर्वपर्यायः आंशिकशब्दो भागवाचको ज्योतिःशास्त्रे द्रष्टव्यः तथा च यादृशं वृत्तं चतुर्भागसमसमार्द्ध

पुण्यश्लोकस्य पादोऽत्र चातुर्यांशेन लक्ष्यते यथावृत्तसमांश्यावा यत्समुद्राः कलागणः १५

रभागं न्यूनाधिकाक्षरभागं वा द्विभागं समसमगणभागं न्यूनाधिकगणभागं वा तस्य सर्वो न्यूनाक्षरोऽधिकाक्षरो न्यू
नगणोऽधिकगणो वा भागस्तेन संज्ञितया करणेन पादः संज्ञायत इत्यर्थः चतुर्भागं समाक्षरभागं वाउक्ताद्युक्तं यत्तं चतु
र्भागं न्यूनाधिकाक्षरभागं उद्गतादि विषममुपचित्रकाद्यर्द्धसमं च द्विभागं समसमगणभागं गीत्यार्यादि द्विभागं न्यू
नाधिकगणभागं पथ्यार्यादि आर्याया अर्द्धभागे पादसंज्ञानुपादाने गुरुत्वं यथास्यादित्येवमर्थं अन्यथा विजया
हुसितः शिवो जयतीत्यादौ मात्रान्यूनत्वं प्रसज्येत चतुर्भागाभावेन पादाभावादर्द्धान्ते गुरुत्वानुपपत्तेः अत एव पथ्यास
त्रिआर्यायामवांतरपादव्यवस्था नास्तीत्याह हलायुधः वाशब्दसमुच्चे लक्षणास्वरसंधानयति तथा च सूत्रं

यथावृत्तसमाप्तिर्वा उक्तोऽर्थः यद्वा भाग इति वर्त्तते वृत्तलक्षणमनतिक्रम्य समाप्तिः समापनमस्य तादृशो भागः पाद इति हलायु
धस्तु यस्य वृत्तस्य यादृशैः पादैर्न्यूनाक्षरैरधिकाक्षरैर्वा समाप्तिर्दृश्यते तस्य तादृशा एव पादा गृहीतव्याः वाशब्दो व्यवस्थितवि
भाषायामिति व्याख्यत् नासौ सूत्राक्षरार्थः उक्तरीत्यानुसरणयोचितः संभवति किंच पादलक्षणे वक्तव्ये पादैः समाप्तिर्दृश्य
तद्वृत्तिलक्षणमनुचितं आत्माश्रयदोषात् अस्मद्व्याख्याने पूर्वलक्षणमनुवादकमित्यस्यैव सर्वसाधारणैकलक्षणत्वे
न व्यवस्थानाश्रयणेन चलाचलत्वात् न च तेजयतीत्यादावार्यानिर्वाहानुपपत्तिप्रसंगाच्चेति यदि नियाः समुद्राश्चतस्रः
कलामात्रास्ताः समस्ताः गणा इति संज्ञां लभन्ते लः समुद्रा गणा इति सूत्रं मात्रिषु गणसंज्ञा षष्ठोजिति वक्ष्यमाणताप
कसिद्धा त्रिकस्य समुदायपरतया लौकिकसिद्धा वा अथास्य सम्योऽर्थः पुण्यः पुण्यजनकः श्लोकः कीर्तिरस्य ता
दृशस्य कृष्णाद्यवतारवत ईश्वरस्य पादश्चरणश्चातुर्यांशेन वेदान्तादिश्रवणादिजनितेन बुद्धिवैराग्येन लक्ष्यते
उपायान्तरमाह यथेति यादृशं यस्य वृत्तमाचरणं कर्मानुष्ठानं ब्राह्मणादेर्यजनयाजनादिरूपं तस्य समाप्तिः साग
तथा पूर्णतानतया वा लक्ष्यते ननु स किंलक्षण ईश्वरो यस्य पादो दृश्य इत्यतस्तटस्थलक्षणमाह यत्रेति दि समुद्रा इ
त्युपलक्षणं स्थावरजंगमप्रपंचस्य सर्वोऽपि प्रपंचो यस्य कलागणः शिल्पसमुदायः यद्विरचितः सर्वोऽपि ब्रह्माण्डप्र
पंचस्तत्वादर्शनेन वर्ण्यपतितत्वमिति भावः १५

49

तंच्छेदानाह सइति सगणः सर्वगुरुः प्रथमः अंतगुरुः द्वितीयो मध्यगुरुः तृतीयः आदिगुरुः चतुर्थः नेन सहितो ल-
घुर्नलघुश्चतुर्लघुः सर्वलघुः पंचम इति तत्र मात्राचतुष्टयात्मकत्वात् सर्वगुरुर्द्विगुरुरित्यादूह्यं अपिः समुच्चये
असौ गणः सुखविधोदितः शोभनाभिः खविधाभिः पंचप्रकारैरुदितः उत्पन्नः आर्यादीनां छंदसां मर्यादां कुर्यात्
आर्यादिगणवृत्तेष्वेव उपयुज्यते इति भावः गोगंतमध्यादिर्ल इति सूत्रं विस्पष्टार्थं ॥ ४ ॥ वृत्तानां मितिहला-
युधः प्रस्तारविधया पंचगणेषु सिद्धिरिति तदाशयः वस्तुतस्तु मात्राप्रस्तारविधिज्ञापनार्थमिदं अंतश्च मध्य

सतु सर्वांतमध्यादिगुरुर्न लघुरप्यसौ आर्यादिवृत्तमर्यादां कुर्यात् सुखविधोदितः ३६

श्चादिश्चेति द्वंद्वः गो गंतमध्यादिर्यस्येति व्यधिकरणबहुव्रीहिः हलायुधस्तु समानाधिकरणबहुव्रीह्यभि-
प्रायेण द्वंद्वात्परो यः श्रूयते लभते सो प्रत्येकाभिसंबंधमित्यवोचत् तत्प्रमादात् इह द्वंद्वात्पूर्वं गकारश्रवणात्
अथ सम्योर्थः तत्र स्थलक्षणस्यैव विध्यं दर्शयति सइति ईश्वरः सर्वप्रपंचस्यांतगुरुरंतजनकः संहर्त्ता म-
ध्यगुरुः स्थितिजनकः आदिगुरुः सृष्टिकर्त्ता अत एवासौ लघुर्न अनादरणीयो नेति भावः अपिः संभावना-
यां ननु तादृशस्याप्यस्मदादिवन्नानाविधजन्मस्वीकारे को हेतुरिति आशंक्याह आर्येत्यादि

सुखविधयालीलयेवोदितोदेवक्यादिषुवसुदेवादेराविर्भूतः सन् आर्याणां साधूनां आदिशब्दाद्ब्राह्मणादिव
र्णिनां च वृत्तमाचरणं धर्मानुष्ठानरूपं तस्य मर्यादां कुर्यात् संभावनायां लिङ् साधुपरित्राणं धर्मसंस्थापनं च

इति वृत्तोक्तरत्नाख्ये काव्ये नारायणोदिते संज्ञा
धिकारः सम्पार्थः सर्गः संपूर्णः आदिमः १७

लीलाविग्रहस्वीकारे हेतुरिति भावः तदुक्तं परित्राणाय साधूनां विनाशाय च दुष्कृतां धर्मसंस्थापनार्थाय संभ
वामि युगे युगे इति ३६ संज्ञाधिकारमुपसंहरति इतीति सम्पोर्थोऽस्य ता दृशः सर्गो अध्यायः १७ इति श्री
त्रिरत्नविवृत्तौ सत्त्वार्थप्रकाशे सम्पार्थसंस्कृतौ परी